सौष्ठवौदार्यविशेषशालिनीं—सुष्ठु भावः सौष्ठवम् उदारस्य भावः औदार्यम् सौष्ठवञ्च औदार्यञ्च सौष्ठवौदार्ये, सौष्ठवौदार्ययोः विशेषः सौष्ठवौदार्यविशेषः सौष्ठवौदार्य विशेषेण शालते शोभते इति सौष्ठवौदार्यविशेषशालिनी ताम् सौष्ठवौदार्यविशेषशालिनीम्। सुष्ठु+अण् सौष्ठवम्, उदार+ष्यञ्=औदार्यम् शाल्+णिनि+ङीप् =शालिनी सौष्ठवौदार्ये इस समस्त पद में 'अजाद्यन्तम्' सूत्र के अनुसार अजादि शब्द औदार्य का पूर्वनिपात होना चाहिए परन्तु ऐसा यहाँ पर नहीं किया गया क्योंकि आचार्य पाणिनि ने भी 'लक्षणहेत्वोः क्रियायाः' सूत्र में लक्षण तथा हेतु में द्वन्द्व समास करने पर 'अल्पाच्तरम्' सूत्र से अल्प अच् वाले 'हेतु' शब्द का पूर्वनिपात नहीं किया। इस कारण यह ज्ञात होता है कि पूर्वनिपात का नियम नित्य नहीं अपितु अनित्य है। काशिकाकार ने भी इसी बात को 'अयमेव हेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्' कहकर स्पष्ट किया है।

विनिश्चितार्थाम्—विशेषेण निश्चितः निर्णीतोऽर्थो यस्याः सा विनिश्चितार्था ताम्।

आददे—आङ्+दा+लिट् एकवचन 'आङो दोऽनास्यविहरणे' से आत्मनेपद। आङ् पूर्वक दा धातु का अर्थ स्वीकार करना या कहना होता है।

छन्द—वंशस्थ

अलंकार—अनुप्रास

विशेष—शत्रु का विनाश करने वाले प्रत्येक व्यक्ति का कर्तव्य होता है कि राजनीति के साम-दाम—दण्ड-भेद नीति का आश्रय ग्रहण करे क्योंकि भेदनीति द्वारा शत्रु के रहस्य को जानकर ही उससे बदला लिया जा सकता है युधिष्ठिर भी शत्रु का विनाश चाहते हैं इसी कारण वनेचर को गुप्त रूप में दुर्योधन का भेद लेने के लिए भेजा था। क्योंकि उसके द्वारा सूचना मिलने पर ही इस सम्बन्ध में कुछ प्रयास किया जा सकता। इसी कारण महाराज युधिष्ठिर दुर्योधन के राज्य का समाचार सुनने को अत्यन्त उत्सुक हो रहे थे।

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः॥४॥

अन्वय—हे नृप क्रियासु युक्तैः अनुजीविभिः चारचक्षुषः प्रभवः न वञ्चनीयाः। अतः असाधु वा साधु क्षन्तुम् अर्हसि। हितम् मनोहारि च, वचः दुर्लभम्।

वाच्यान्तरम्—हे नृप! क्रियासु युक्तः अनुजीविनः चारचक्षुषः प्रभून् न वञ्चयेयुः अतः असाधु वा साधु वचनं त्वया अर्ह्यते। हितेन मनोहारिणा वचसा दुर्लभेन भूयते।

क्रियास्विति—हे नृप, क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिः भृत्यैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चारादिभिरित्यर्थः। चरन्तीति चराः। पचाद्यच्। त एव चाराः। चरेः पचाद्यजन्तात् प्रज्ञादित्वादण् प्रत्ययः। त एव चक्षुर्येषां ते चारचक्षुषः। 'स्वपर-मण्डले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्' इति नीतिवाक्यामृतम्। प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः। सत्यमेव वक्तव्या इत्यर्थः। चारापचारे चक्षुरपचारवत् राज्ञां पदे पदे निपात इति भावः। अतोऽप्रतार्यत्वाद्धेतोः। असाध्वप्रियं साधु प्रियं वा यदुक्तमिति शेषः। क्षन्तुं सोढुमर्हसि। कुतः हितं पथ्य मनोहारि च वचो दुर्लभम्। अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ॥४॥

अर्थ—हे राजन्! स्वामी के द्वारा कार्यों में नियुक्त किए गए भृत्यों को गुप्तचर रूपी नेत्रों से देखने वाले स्वामी को कभी धोखा नहीं देना चाहिए इस कारण मैं सत्य कहूँगा यदि मेरी बात कुछ कटु हो तो उसे आप क्षमा करने में समर्थ हैं क्योंकि हित करने वाली और प्रिय वाणी दुर्लभ होती है।

व्याख्या—हे नृप=हे राजन् (हे राजन् युधिष्ठिर) क्रियासु=कार्येषु (करने योग्य वस्तुओं में) युक्तैः=नियुक्तैः (लगाए गए) अनुजीविभिः=सेवकैः (अनुचरों के द्वारा) चारचक्षुषः=गुप्तचरनेत्राः (गुप्तचर रूपी नेत्रों वाले) प्रभवः=स्वामिनः (स्वामी लोग) न वञ्चनीयाः=न प्रतारणीयाः (ठगे नहीं जाते) अतः अस्मात् कारणात्=इस कारण से असाधु=अप्रियम् (अप्रिय) वा=अथवा, साधु=सम्यक् प्रियम् (ठीक और प्रिय) क्षन्तुम=सोढुम् (सहन करने के लिए) अर्हसि=योग्योऽसि (योग्य हो, समर्थ हो) हितम्=कल्याणकारम् (कल्याणकारक) मनोहारि=प्रियं सुखकरम् (प्रिय और सुख देने वाली) वचः=वचनम् (वाणी) दुर्लभम्=दुःखेन लभ्यते (बड़ी कठिनाई से प्राप्त होती है)।

व्याकरण—हे नृप—नॄन् पाति इति नृपः तत्सम्बुद्धौ हे नृप नृ+पा+क=नृप। युक्तैः—युज्+क्त तृतीया बहुवचन।

अनुजीविभिः—अनुजीवन्ति तच्छीलाः अनुजीविनः तैः अनुजीविभिः। अनु+जीव्+णिनि। 'सेवकार्थ्यनुजीविनः।' इत्यमरः।

चारचक्षुषः=चरन्तीति चराः, चरा एव चाराः, चारा एव चक्षूंषि येषां ते चारचक्षुषः। 'यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः। चारश्च गूढपुरुषश्च' इत्यमरः।

वञ्चनीयाः—वञ्च्+अनीयर्=वञ्चनीयाः।

प्रभवः—प्रभवन्ति इति प्रभवः। प्र+भू+क्विप्।

क्षन्तुम्—क्षम्+तुमुन्।

मनोहारि—मनोहरति इति मनोहारि। मनस्+हृ+णिनि।

दुर्लभम्—दुःखेन लभ्यते यत् तत् दुर्लभम्। दुर्+लभ्+खल्।

छन्द—वंशस्थ।

अलंकार—अर्थान्तरन्यास—क्योंकि विशेष वाक्य का सामान्य से समर्थन है।

विशेष—राज्य के सम्पूर्ण कार्य को सुव्यवस्थित रूप से चलाने के लिए राजाओं को गुप्तचरों की नियुक्ति करनी पड़ती है क्योंकि राजा स्वयम् सम्पूर्ण शासन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

की देख-रेख नहीं कर सकते । उनका सारा कार्य गुप्तचरों पर आधारित रहता है । इसी कारण राजा लोग चारचक्षुपः कहे जाते हैं । नीतिवाक्य है कि 'चारैः पश्यन्ति राजानः शास्त्रैः पश्यन्ति पण्डिताः । गावः पश्यन्ति गन्धेन चक्षुर्भ्यामितरे जनाः ।' यह गुप्तचर राज्य और राजा के कल्याण के लिए सत्य बोलते थे । सत्य कटु अवश्य हो जाता है इसी कारण वनेचर कहता है कि कटूक्ति के लिए क्षमा करना क्योंकि हित-कर और प्रियवचन दुर्लभ हैं । अतः मेरी अप्रिय वाणी आपके लिए हितकर होगी ऐसा सोचकर क्षमा कीजियेगा ।।४।।

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संश्रृणुते स किं प्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ।।५।।

अन्वय—यः अधिपं साधु न शास्ति, स किं सखा ? (वा किंसखा) यः हितात् न संश्रृणुते स किं प्रभुः । (वा किंप्रभुः) हि सदा अनुकूलेषु नृपेषु अमात्येषु च सर्व-सम्पदः रतिम् कुर्वते ।।५।।

वाच्यान्तरम्—येन अधिपो न साधु शिष्यते, तेन किं सख्या भूयते, येन हितान्न संश्रूयते तेन किं प्रभुणा भूयते । हि सदानुकूलेषु नृपेष्वमात्येषु सर्वसम्पद्भिः रतिः क्रियते ।

स इति—यः सखाऽमात्यादिरधिपं स्वामिनं साधु हितं न शास्ति नोपदिशति । 'ब्रु विशासि ।' इत्यादिना शासेर्दुहादिपाठात् द्विकर्मकत्वम् । स हितानुपदेष्टा । कुत्सितः सखा किंसखा । दुर्मन्त्रीत्यर्थः । किमः क्षेपे इति समासान्तप्रतिषेधः । तथा यः प्रभुः निग्रहानुग्रहसमर्थः स्वामी हितादाप्तजनाद्धितोपदेष्टुः सकाशात् । आख्यातोपयोगे इति अपादानात्पञ्चमी । न संश्रृणुते न श्रृणोति हितमिति शेषः । 'समोगम्यृच्छि' इत्या-दिना सम्पूर्वाच्छृणोतेरकर्मकादात्मनेपदम्, अकर्मकत्वम् वैवक्षिकम् । स हितमश्रोता प्रभुः किंप्रभुः कुत्सितस्वामी पूर्ववत्समासः । सर्वथा सचिवेन वक्तव्यम् श्रोतव्यं स्वामिना एवं च राजमन्त्रिणोरैकमत्यं स्यादित्यर्थः । ऐकमत्यस्य फलमाह—सदेति—हि यस्मा-न्नृपेषु अमा सह भवा अमात्यास्तेषु च । अव्ययात्त्यप् । अनुकूलेषु परस्परानुक्तेषु सत्सु सर्वसम्पदः सदा रतिमनुरागं कुर्वते कुर्वन्ति न जातु जहतीत्यर्थः । अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः । अत्रैवं राजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्य-सिद्धैरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसम्पत्सिद्धिरूपकार्येण समर्थनाद् कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । तदुक्तम्—सामान्यविशेषकार्यकरणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः ।

अर्थ—जो अपने स्वामी को हितपूर्ण उपदेश नहीं देता वह क्या सच्चा मित्र है या दुष्ट मित्र है ? जो स्वामी अपने हितचिन्तकों की बात नहीं सुनता वह क्या सच्चा स्वामी है या नीच स्वामी है । क्योंकि राजा और मन्त्री परस्पर अनुकूल रहने पर ही सारी समृद्धियाँ सदैव अनुराग करती हैं ।

व्याख्या—यः सखा=योऽमात्यदिः (जो मन्त्री मित्र आदि) अधिपम्=स्वामि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम् (अपने स्वामी को) साधु=हितम् (सुन्दर हितपूर्ण) न शास्ति=नोपदिशति (नहीं उपदेश देता है) सः=जनः (वह मनुष्य, मन्त्री, मित्र आदि) किं सखा=कुत्सितं मित्रम् (दुष्ट मित्र है अथवा क्या वह मित्र है ? अर्थात् मित्र तो सदैव अन्धकार से दूर करने वाला है) यः=प्रभुः (जो स्वामी) हितात्=अमात्यादेः (अमात्य, मित्र आदि से) न संश्रृणुते=न श्रृणोति (हित वाक्यों को नहीं सुनता है) सः=श्रवणविमुखः (हित वचनों को सुनने से विमुख) किंप्रभुः=न प्रभुः कुत्सितप्रभुः (राजा नहीं है अथवा वह नीच राजा है) हि=यतः (क्योंकि) सदा=निरन्तरम् (सदैव) अनुकूलेषु=अनुरक्तेषु (परस्पर अनुरक्त रहने पर) नृपेषु=राजसु (राजाओं तथा) अमात्येषु=मन्त्रियों के। सर्वसम्पदः=सकलसम्पत्तयः (सम्पूर्ण समृद्धियाँ) रतिम्=स्नेहम् (प्रेम को) कुर्वते=कुर्वन्ति (करती है)।

व्याकरण—अधिपः अधि पाति इति अधिपः तम् अधि+पा+क। किंसखा—कुत्सितः सखा किंसखा (कर्मधारय समास) 'वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत्' इत्यमरः।

साधु—'सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्'।

हितात्—हितम् अस्ति अस्य इति हितः तस्मात् हितात्। हित+अच् (अर्श आदिभ्योऽच्) यहाँ पर पंचमी विभक्ति का प्रयोग 'आख्यातोपयोगे' सूत्र के आधार पर हुआ है। तात्पर्य यह है कि जब किसी अध्यापक या गुरु से कोई वस्तु नियम पूर्वक पढ़ी या न सुनी जाती है तो उपदेश देने वाले गुरु की अपादान संज्ञा होकर पंचमी विभक्ति हो जाती है।

संश्रृणुते—'श्रु' धातु वस्तुतः सकर्मक है परन्तु यहाँ कर्म अविवक्षित होने के कारण 'प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया' इस नियम से अकर्मक हो गई। 'अर्तिश्रुदृशिभ्यश्चेति' इस वार्तिक से यहाँ आत्मनेपद का विधान किया गया। सम् पूर्वक ऋ, श्रु तथा दृश् धातु अकर्मक होने पर आत्मनेपद में प्रयुक्त होती हैं। भट्टोजिदीक्षित ने कर्मणोऽविवक्षातः की व्याख्या करते हुए 'हितान्न यः संश्रृणुते स 'किंप्रभुः उदाहृत किया।

किंप्रभु—कुत्सितः प्रभुः किंप्रभुः।

सदा सर्वस्मिन् काले सदा सर्वदा वा। अव्यय होने के कारण विभक्ति का लोप हो जाता है। तथा 'सर्वैकान्यकियत्तदः काले दा' सप्तम्यन्त कालवाचक सर्व, एक अन्य, किम्, यत् और तद् से दा प्रत्यय होता है। सर्व+दा। दा प्रत्यय होने पर 'सर्वस्य सोऽन्यतरस्यां दि' सूत्र से 'सर्वः' के स्थान पर 'स' आदेश विकल्प से हो जाता है तब (सदा) सिद्ध होता है।

सर्वसम्पदः—सम्पद्यन्ते इति सम्पत्, सर्वाः सम्पदः सर्वसम्पदः। सम्+पद्+क्विप्। अथ सम्पदि। सम्पत्तिः श्रीश्च लक्ष्मीश्च इत्यमरः।

छन्द—वंशस्थ।

अलंकार—अर्थान्तरन्यास। यहाँ मन्त्री द्वारा हित वचन न कहने तथा राजा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वारा हित वचन न सुनने की निन्दा करके दोनों की परम्परानुकूलरूपकारण समर्थन द्वारा सर्वसम्पत्तिलाभरूप कार्य के होने के कारण अर्थान्तरन्यास अलङ्कार है जैसा कि कहा गया है। "सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्ट-प्रकृतिसमर्थनमर्थान्तरन्यासः।

विशेष—जब राजा और मन्त्री दोनों में ऐकमत्य रहता है तभी सकल सम्पत्तियाँ तथा सुख राज्य में प्राप्त होता है। इसके लिए आवश्यक है कि मन्त्री राजा को उचित सलाह दे और राजा भी उसे सुने जो ऐसा नहीं करते वे दुष्ट मन्त्री तथा दुष्ट राजा होते हैं। कारण यह है कि सत्य बात में कटुता अवश्य कुछ न कुछ आ ही जाती है। इस कटुता पर राजा को ध्यान न देकर उसके सार तत्त्व पर ध्यान देना चाहिए। इस प्रकार शासन सुगमता से चलता है। अतः मैं अपना कर्तव्य समझकर आपसे यथार्थ बात कहूँगा और आप-अपना कर्तव्य समझकर उसे शान्तिपूर्वक सुनकर राज्यप्राप्ति के विषय में विचार कीजिए ॥५॥

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥६॥

अन्वय—निसर्गदुर्बोधम् भूपतीनां चरितं क्व। अबोधविक्लवाः जन्तवः क्व। मया विद्विषाम्, निगूढतत्त्वम् नयवर्त्म यद् अवेदि अयम् तव अनुभावः ॥ ६ ॥

वाच्यान्तरम्—निसर्गदुर्बोधन भूपतीनां चरितेन क्व। अबोधविक्लवैः जन्तुभिः क्व। अहं विद्विषां निगूढतत्त्वम् नयवर्त्म यदवेदिषम् अनेन तवानुभावेन (भूयते)।

निसर्गेति—निसर्गदुर्बोधम् स्वभावदुर्ग्रहम्। 'ईषद्दुः' इत्यादिना खल्प्रत्ययः। भूपतीनां चरितं क्व। अबोधविक्लवा अज्ञानोपहता जन्तवः मादृशाः पामरजना इत्यर्थः क्व। नोभयं सङ्घटत इत्यर्थः। तथापि निगूढतत्त्वं संवृतयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः। "सन्धिविग्रहयानानि संस्थाप्यासनमेव च। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्" । इत्यादिरूपो यन्मयाऽवेदि। ज्ञातमिति यावत्। विदेः कर्मणि लुङ्। अयम्। इदं वेदनमित्यर्थः। विधेय-प्राधान्यात्पुंल्लिगनिर्देशः। तवानुभावः सामर्थ्यम्। अनुगतो भावः अनुभावः इति घञन्तेन प्रादिसमासः। न तूपसृष्टाद्घञ् प्रत्ययः। श्रिणीभुवोऽनुपसर्गे इति भवतेः धातोर्घञ्विधानात् अतएव काशिकायाम्—कथं प्रभावो राज्ञां प्रकृष्टो भावः इति प्रादिसमासः इति। दोषपरिहारौ सम्यग्ज्ञात्वैव विज्ञापयामि। न तु वृथा कर्णकठोरं प्रलपामीत्याशयः ॥६

अर्थ—स्वभाव से ही कठिन अतः न समझने योग्य राजाओं का चरित्र कहाँ और मेरे समान मन्द बुद्धि वाले जंगली आदमी कहाँ। ऐसा अन्तर होने पर भी मैं आपके शत्रुओं के गूढ तत्त्व वाली राजनीति को जितना समझ सका हूँ वह केवल आपका ही प्रभाव है।

व्याख्या—निसर्गदुर्बोधम्=स्वभावदुर्ग्रहम् (स्वभाव से ही कठिन) भूपतीनाम्=नृपाणाम् (राजाओं का) चरितम्=व्यवहारः (राज्यशासनव्यवस्थारूप व्यवहार) क्व=कुत्र (कहाँ) अबोधविक्लवाः=स्वभावजडाः (स्वभाव से ही अज्ञानी)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जन्तवः=प्राणिनः (हमारे समान अरण्यवासी वनेचर, यहाँ पर जन्तु शब्द का प्रयोग अपनी तुच्छता को प्रकट करने के लिये प्रयुक्त किया गया है) क्व=कुत्र (कहाँ) मया=वनेचरेण (मुझ वनेचर के द्वारा) विद्विषाम्=शत्रूणाम् (आपके शत्रुओं का) निगूढतत्त्वम्=गुप्ततत्त्वम् अप्रकटितरहस्यं नयवर्त्म=नीति-मार्गः (नीति का मार्ग, यहाँ पर नीतिमार्ग से तात्पर्य राजनीति के उन छः गुणों से है जो शासन-प्रणाली के महत्व-पूर्ण अंग माने जाते हैं, जैसे सन्धि—मेल, विग्रह=युद्ध, यान=चढ़ाई करना, आसन=सेना को व्यूह रूप में रखकर समय की प्रतीक्षा करना, द्वैधीभाव=भेदनीति का आश्रयण करना अर्थात् एक ओर अपनी सेना को मित्रता के लिए प्रेरित करना दूसरी ओर सेना के कुछ अंश से आक्रमण करवा देना, आश्रय=आत्मसमर्पण। इसी को नीतिशास्त्र में कहा गया है "सन्धिविग्रहयानानि संस्थाप्यासनमेव च। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्"। राजनीतिशास्त्र के महारथी आचार्य चाणक्य ने भी षाड्गुण्य का प्रयोग बताया है। इससे शासन में स्थिरता आती है। यत्=यत्किञ्चित् (जो कुछ थोड़ा बहुत) अवेदि=ज्ञातम् (जाना गया है) (तत्=वह सब) अयम् =यह, तव=भवतः (आप महाराज युधिष्ठिर का) अनुभावः=प्रभावः (प्रभाव ही है) अर्थात् आपके सम्पर्क में रहने के कारण मुझे भी कुछ ज्ञान हो गया है क्योंकि महनीय व्यक्तियों का सम्पर्क प्राप्त करके लघीयान् पुरुष भी महान् हो जाते हैं; जैसे काँच भी कंचन के सम्पर्क में कान्तियुक्त होता है। अतः आपके प्राप्त ज्ञान के आधार पर ही मैं कुछ समझ सका हूँ।

व्याकरण—निसर्गदुर्बोधम्=निसृज्यते इति निसर्ग, दुःखेन बुध्यते इति दुर्बोधम् निसर्गेण दुर्बोधम् निसर्गदुर्बोधम्। नि+सृज्+घञ्=निसर्गः दुर्+बुध्+खल् "ईष-द्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्" से खल् प्रत्यय हुआ। भूपतीनामपाति इति पतिः, भुवः पति भूपतिः तेषां भूपतीनाम्। पा+डति+पतिः। पति शब्द जब समाज में प्रयुक्त होता है तो उसके रूप हरि शब्द के समान होते हैं अन्यथा सखि शब्द के समान होते हैं। क्व—किम् शब्द से 'किमोऽत्' ५।३।१२ से अत् प्रत्यय होने के अनन्तर 'क्वाति' ७।२।१०५ से किम् के स्थान पर क्व आदेश हो जाता है। अबोधविक्लवाः=न बोधः अबोधः, अबोधेन विक्लवाः अबोधविक्लवाः। बुध्+घञ्=बोधः। "विक्लवो विह्-वलः स्यात्तु विवशोऽरिष्टदुष्टधीः" इत्यमरः। वि+क्लु—अच्=विक्लवः विद्विषाम् =विशेषेण द्विषः विद्विषः तेषाम् विद्विषाम्। निगूढतत्त्वं=निश्चयेन गूढं तत्व यस्य तद् निगूढतत्त्वम्। नि—गुह—क्त। नयवर्त्म=नीयते अनेन इति नयः, नयस्य वर्त्म नय-वर्त्म। अनुभावः—भवनं भावः अनुगतः भावः अनुभावः भू—घञ्। यहाँ 'अनु' भू धातु का उपसर्ग नहीं है अतएव 'श्रिणीभुवोऽनुपसर्गे से घञ् प्रत्यय हुआ है अर्थात श्रि, नी तथा भू धातु से उपसर्ग न होने पर घञ् प्रत्यय होता है। इस कारण 'अनु' भावः के पूर्व में प्रयुक्त है।

छन्द—वंशस्थ।

अलंकार—विषमालङ्कार=जहाँ पर कार्य और कारण के गुण या क्रियायें

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परस्पर विरुद्ध हों, अथवा प्रारम्भ किया हुआ कार्य अपूर्ण हो प्रत्युत कुछ अनर्थ आ पड़े या दो विरूप पदार्थों का मेल हो वहाँ विषमालङ्कार होता है। 'गुणौ क्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः। यद्वारब्धस्य वैफल्यमनर्थस्य च सम्भवः। विरूपयोः संघटना या च तद्विषमं मतम्।' यहाँ अबोधविक्लव जन्तु और निगूढ़तत्त्व नीतिमार्ग युक्त राजाओं का चरित इन दोनों विरूप पदार्थों की योजना हुई है।

विशेष—इस श्लोक द्वारा राजनीति के षाड्गुण्य का वर्णन किया गया है। इससे कवि की विद्वता का परिचय मिलता है। आचार्य चाणक्य ने इसको विशेष महत्व दिया है। कौटिल्य के अनुसार शर्तों के साथ शान्ति सन्धि, हानिकारक उपायों को प्रत्यक्ष रूप से करना विग्रह, उपेक्षा करना आसन, चढ़ाई करना यान, दूसरे का सहारा लेना स्श्रय, तथा एक से लड़ना और दूसरे के साथ सन्धि करना द्वंधीभाव कहलाता है। यदि शत्रु से कमजोर हो तो सन्धि करे, युद्ध के लिए तैयार हो तो विग्रह करे, एक दूसरे को हानि पहुँचाने में असमर्थ हो तो उदासीनता अर्थात् आसन ग्रहण करे, यदि समर्थ अधिक हो तो चढ़ाई अर्थात् यान करे, यदि कमजोर हो तो सहारा ले, यदि सहायता से साध्य हो तो द्वंधीभाव को धारण करे। यही छः प्रकार की नीतियाँ हैं। इन सबका ज्ञान युधिष्ठिर के साथ रहने से वनेचर को हो गया था। यही कारण है कि वह दुर्योधन की चालों को समझ सका।

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः॥७॥

अन्वय—सुयोधनः नृपासनस्थः अपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः दुरोदरच्छद्मजितां जगतीम् नयेन जेतुम् समीहते॥

वाच्यान्तरम्—सुयोधनेन नृपासनस्थेनापि वनाधिवासिनो भवतः पराभवं विशङ्कमानेन दुरोदरच्छद्मजिता जगती नयेन जेतुं समीह्यते।

विशङ्कमान इति—सुखेन युध्यते सुयोधनः। 'भाषायां शासियुधिदृशिधृषिभ्यो युज्वाच्यः'। नृपासनस्थोऽपि सिंहासनस्थोऽपि। वनमधिवसतीति तस्माद् वनाधिवासिनो वनस्थात्। राज्यभ्रष्टादपीत्यर्थः। भवतस्त्वत्तः पराभवं पराजयं विशङ्कमानः उत्प्रेक्षमाणः सन्। दुष्टमुदरमस्येति दुदोदरं द्यूतम्। पृषोदरादित्वात्साधुः। 'दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्' इत्यमरः। तस्य छद्मना मिषेण जितां लब्धां दुर्नयार्जितां जगतीं महीम्। 'जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोः' इति वैजयन्ती। नयेन नीत्या जेतुं वशीकर्तुं समीहते व्याप्रियते। न तूदास्त इत्यर्थः। बलवत्स्वामिकमविशुद्धागमञ्च धनं भुञ्जानस्य कुतो मनः समाधिरिति भावः। अत्र दुरोदरच्छद्मजितामिति विशेषणपदार्थस्य चतुर्थपदार्थं प्रति हेतुत्वेनोपन्यासाद् द्वितीयकाव्यलिङ्गमलङ्कारः। तदुक्तम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्।'

अर्थ—वह दुर्योधन राजसिंहासन पर आसीन होते हुए भी वन में निवास करने वाले आप लोगों से आने वाले भय की आशङ्का करता हुआ जुए रूपी कपट से जीती हुई पृथिवी को नीतिपूर्वक अपने वश में करना चाहता है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याख्या—सुयोधनः=दुर्योधनः (वह राजा दुर्योधन) नृपासनस्थः=सिंहासनाधिरूढः (राजसिंहासन पर अधिरूढ़ होता हुआ भी) वनाधिवासिनः=अरण्यवासिनः (उस समय भाग्यवश अरण्य में निवास करने वाले) भवतः=त्वत्तः (आप युधिष्ठिर से) पराभवम्=पराजयम् (आने वाले पराजय को) विशङ्कमानः=उत्प्रेक्षमाणः (आशङ्का करते हुए, पता नहीं किस समय पाण्डव आकर के हम लोगों का विनाश करके राज्य को ग्रहण कर लें इस प्रकार के भय से सदैव शङ्कित रहता हुआ) दुरोदरच्छद्मजिताम्=द्यूतकपटेन वशीकृताम् (जुए में कपट से जीती हुई) जगतीम्=महीम् (पृथिवी को) नयेन=नीत्या (नीतिपूर्वक) जेतुम्=वशीकर्तुम् (वश में करने के लिए) समीहते=चेष्टते (निरन्तर प्रयास करता रहता है ॥

व्याकरण—नृपासनस्थः=नृ नृ पाति इति नृपः, आस्मते अस्मिन् इति आसनम् नृपस्य आसनम् नृपासनम्, नृपासने तिष्ठतीति नृपासनस्थः। आस्+ल्युट्=आसनम्, नृपासन+स्था+क=नृपासनस्थः। सुयोधनः=सुखेन युध्यते इति सुयोधनः। सु+युध्+युच्+अन। यहाँ पर "भाषायां शासियुधिदृशिधृषिभ्यो युज्वाच्यः" इस वार्तिक से युच् प्रत्यय हुआ है। वनाधिवासिनः—वनम् अधिवसति इति वनाधिवासी तस्मात् वनाधिवासिनः। वन+अधि+वस्+णिनि। भवतः=भाति इति भवत् या+डवतु। पराभवम्-पराभवनं पराभः तम् पराभवम्। परा+भू+अप्। 'पराभवः परिभवः परिभूतः पराजयः' इति कोषः।

विशङ्कमानः=विशङ्कते इति विशङ्कमानः। वि+शङ्क्+शानच्। दुरोदरच्छद्मजिताम्=दुः दुष्टम् उदरम् अस्य इति दुरोदरम् दुरादरस्थ छद्म दुरोदरच्छद्म, दुरोदरच्छद्मना जिता दुरोदरच्छद्मजिता ताम् दुरोदरच्छद्मजिताम्। दुर्+उदरम्=दुरोदरम् यहाँ पर 'पृषोदरादीनि यथोपदिष्टम्' इस नियम से निपातनात्, 'ओ' होकर दुरोदर हो जाता है, अन्यथा 'दुरुदरम्' यह होना चाहिए। इसी प्रकार पृषत्+उदरम्=पृषोदरम्, वारिवाहकः=वलाहकः यहाँ पर वारिव् के स्थान पर वलादेश होकर वलाहक होता है। इससे कुछ अन्य शब्द भी बनते हैं जिनके लिये यह कारिका ही नियम है 'भवेद्वर्णागमाद्हंसः सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम्।' हस् धातु के अनुस्वारवर्ण का आगम हंस, हिंस् धातु के उपर्युक्त नियम से वर्णपरिवर्तन सिंह आदि शब्द इसी नियम से सिद्ध होते हैं।

'दुरोदरे द्यूतकारे पणे द्यूते दुरोदरम्' इत्यमरः।

जगतीम्—गच्छतीति जगत्+ङीष् ताम्=जगतीम्।

जेतुम्—जि+तुमुन्=जेतुम्।

समीहते—सम्+ईह+लट्=समीहते—आत्मनेपद का प्रयोग किया गया है।

छन्द—वंशस्थ।

अलंकार—काव्यलिंग अलंकार—क्योंकि काव्यलिंग वहाँ होता है जहाँ वाक्य या पद के अर्थ का कारण का उपन्यास किया जाय। यहाँ पर 'दुरोदरच्छद्मजिताम्' इस विशेषण पद का अर्थ 'नयेन जेतुम्' के कारण रूप में उपस्थपित किया गया है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन् भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ॥८॥

अन्वय—तथापि जिह्मः स भवज्जिगीषया, गुणसम्पदा, यशः तनोति। भूतिम् समुन्नयन् अनार्यसंगमात् महात्मभिः समम् विरोधः अपि वरम् ॥ ८ ॥

वाच्यान्तर—तथापि जिह्मेन भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तन्यते। भूतिं समुन्नयता अनार्यसंगमात् महात्माभिः विराधेनापि वरेण भूयते ॥८ ॥

तथापीति—तथापि साशङ्कोऽपीति। जिह्मो वक्रः वञ्चक इति यावत्। स दुर्योधनो भवज्जिगीषया गुणैर्भवन्तमाक्रमितुमिच्छत्यत्यर्थः। 'हेतौ' इति तृतीया। गुणसम्पदा दानदाक्षिण्यादिगुणगरिम्णा कारणेन। शुभ्रं यशस्तनोति। स खलो गुणलोभनीयां त्वत्सम्पदमात्मसात्कर्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः। नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महानस्त्यस्य दोष इत्याशङ्क्य सोऽपि सत्संगालाभे नीचसङ्गमाद् वरमुत्कर्षावहत्वादित्वादित्याह—समिति। तथा हि भूतिं समुन्नयन्नुत्कर्षमापादयन्। 'लटः शतृशानचौ' इत्यादिना शतृप्रत्ययः। पुनर्लङ्ग्रहणसामर्थ्यात् प्रथमासमानाधिकरण्यम्। महात्मभिः समम्। सहेत्यर्थः। 'साकं सत्रा समं सह' इत्यमरः। अनार्यसंगमात्। 'पञ्चमी विभक्ते:' इति पञ्चमी। विरोधोऽपि वरं मनाक्प्रियः 'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवं मनाक्प्रिये' इत्यमरः। अत्र 'मैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य भूतिं समुन्नयन्' इत्यस्य पूर्वं वाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्ताख्यानदोषापत्तिः। तदुक्तं काव्यप्रकाशे—'समाप्तपुनरादानात्समाप्तं पुनरात्तकम्' इति। न च वाक्यान्तरमेतत् येनोक्तदोषपरिहारः स्यात्। अर्थान्तरन्यासालङ्कारः। स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधवत्त्वं प्रति हेतुत्वाभिधानरूपकाव्यलिंङ्गानुप्राणित इति।

अर्थ—सशंकित रहता हुआ भी वह कपटमूर्ति दुर्योधन आपसे आगे बढ़ने की कामना से अपने दिखावटी गुणों से निर्मल यश फैला रहा है। क्योंकि ऐश्वर्य को बढ़ाते हुए व्यक्ति के लिए नीचों के संग की अपेक्षा महान् लोगों से विरोध करना भी अच्छा होता है।

व्याकरण—'तथापि—तद्+थाल् प्रकारवचने थाल्' इस सूत्र से यहाँ थाल् प्रत्यय होता है। तथा+अपि=तथापि।

जिह्म=जहाति सरलमार्गम् इति जिह्मः। ओहाक् त्यागे धातु से उणादि सूत्र 'जहातेः सन्वदालोपश्च' से आलोप तथा मन् प्रत्यय और 'सन्यतः' सूत्र से इकार हा+मन्=जहा+मन्=जिह्म। "जिह्मस्तु कुटिलेऽलसे" इत्यमरः।

भवज्जिगीषया=जेतुमिच्छा जिगीषा भवन्तं जेतुमिच्छा भवज्जिगीषा तया भवज्जिगीषया।

गुणसम्पदा=गुणानां सम्पत् गुणसम्पद् तया गुणसम्पदा। शुभ्रम्=शोभते इति शुभ्रम्। शुभ्+रक् उणादि सूत्र 'स्फायितञ्चि' से। 'शुभ्रशुक्लशुचिश्वेतविशदश्वेतपाण्डुराः' इत्यमरः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूतिम्=भवनम् भूतिः ताम् भूतिम्। भू+क्तिन्।

समुन्नयन्=समुन्नयति इति समुन्नयन्। सम्+उत्+शतृ।

अनार्यसंगमात्—न आर्यः अनार्यः अनार्यस्य सङ्गमः अनार्यसङ्गमः तस्मात् अनार्यसङ्गमात्। ऋ+ण्यत्=आर्यः नञ् समास अनार्यः। 'नीचोऽनार्योऽकुलीनोऽपि शठो दुर्वृत्त' इत्यमरः। 'संसर्गः संगमः सम्पर्क इति प्रोच्यते'। महात्मभिः=महान् आत्मा यस्यासौ महात्मा, तैः महात्मभिः। यहाँ पर 'समम्' का योग होने से 'सहयुक्तेऽप्रधाने' से तृतीया विभक्ति। विरोधः=विरुध्यते इति विरोधः। वि+रुध्+घञ्।

छन्द—वंशस्थ।

अलंकार—काव्यलिंग से अनुप्राणित अर्थान्तरन्यास अलंकार क्योंकि महात्माओं के साथ विरोध के अच्छे होने का कारण 'भूतिं समुन्नयन्' इस वाक्य से व्यक्त कर दिया गया है।

विशेष—राजनीति में पटु वनेचर दुर्योधन के व्यवहार को व्यक्त करता हुआ कहता है कि उस दुर्योधन ने छलपूर्वक आपके राज्य पर अधिकार कर लिया है। इस कारण अपने दिखावटी सद्गुणों द्वारा आप पर अनुरक्त प्रजा को अपनी ओर आकर्षित करना चाहता है। उसकी इच्छा है कि इस प्रकार मैं आपके गुणों से प्रभावित प्रजावर्ग को अपने में अनुरक्त कर सकता हूँ। पुनः आपको जीतने में सरलता रहेगी। यह सब आपके भय से कर रहा है क्योंकि सज्जनों से विरोध करना दुष्टों से मैत्री करने की अपेक्षा श्रेष्ठ होता है॥ ८॥

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम्॥९॥

अन्वय—कृतारिषड्वर्गजयेन, अगम्यरूपां मानवीम् पदवीम्, प्रपित्सुना अस्ततन्द्रिणा तेन नक्तन्दिवम् वितन्यते॥ ९॥

वाच्यान्तर—कृतारिषड्वर्गजयः अगम्यरूपां मानवीं पदवीं प्रपित्सुः अस्ततन्द्रिः सः नक्तन्दिवं विभज्य नयेन पौरुषं वितनोति॥ ९॥

कृतेति—षण्णां वर्गः षड्वर्गः। अरीणामन्तः शत्रूणां कामक्रोधादीनां षड्वर्गो अरिषड्वर्गः। शिवभागवतवत्समासः। तस्य जयः कृतो येन तेन तथोक्तेन। विनीतेनेत्यर्थः। विनीताधिकारं प्रजापालनमिति भावः। अगम्यरूपां पुरुषमात्रदुष्प्राप्याम्। मनोरिमां मानवीम्। मनूपदिष्टसदाचारक्षुण्णामित्यर्थः। पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रपत्तुमिच्छुना। प्रपद्यतेः सन्नन्तादुप्रत्ययः। सनिमी-मा-इत्यादिनेसादेशः। 'अत्र-लोपोऽभ्यासस्य' इत्यभ्यासलोपः। अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणा। अनलसेनेत्यर्थः। तदिः सौत्रो धातुः। तस्मात् 'वङ्क्र्यादयश्च' इत्यौणादिकः क्रिन्प्रत्ययः 'कृदिकारादक्तिनो वा ङीष् वक्तव्यः' इति। 'वन्दीघटीतरीतन्द्री' इति ङीषन्तोऽपि इति क्षीरस्वामी। तथा रामायणे प्रयोगः 'निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित्' इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेन दुर्योधनेन। पुरुषस्य कर्म पौरुषं पुरुषकारः। उद्योग इति यावत्। युवादित्वादण्-प्रत्ययः। 'पौरुषं पुरुषस्योक्ते भावे कर्मणि तेजसि' विश्वः नक्तं च दिवा च नक्तन्दिवम्। अहोरात्रयोरित्यर्थः। 'अचतुर'—इत्यादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वनिपातेऽच् समासान्तः। विभज्यास्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते ॥ ६ ॥

अर्थ—काम, क्रोध, लोभ, मोह, मद, मात्सर्य आदि ६ आन्तरिक शत्रुओं को को जीतने वाला तथा अत्यन्त कठिन मनुस्मृति के अनुसार प्रजा-पालन-पद्धति को प्राप्त करने की इच्छा रखने वाला दुर्योधन आलस्य-रहित होकर दिन रात्रि का सम्यक् विभाजन करके न्यायपूर्वक अपने कर्त्तव्य को पूर्ण करने में लगा रहता है।

व्याख्या—कृतारिषड्वर्गजयेन=वशीकृतकामक्रोधादिषड्वैरिणा (काम, क्रोध, लोभ, मोह, मद, मात्सर्य आदि आन्तरिक ६ शत्रुओं को विजित किया है जिसने) अगम्यरूपाम्=लोकदुरापाम् (सभी लोगों के लिये दुर्गम) मानवीम्=मनुसम्बन्धिनीम् (मनु से सम्बन्ध रखने वाली) पदवीम्=पद्धतिम् (प्रजापालन-पद्धति को) प्रपित्सुना =प्राप्तुमिच्छुना (प्राप्त करने की इच्छा रखने वाला) अस्ततन्द्रिणा=निरलसेन (आलस्य रहित) तेन=दुर्योधनेन (उस दुर्योधन के द्वारा) नक्तन्दिवम्=अहोरात्रम् (रात दिन) विभज्य=विभागं कृत्वा (विभाग करके) पौरुषम्=उद्योगम् (उद्योग को) नयेन=न्यायेन (न्याय पूर्वक) वितन्यते=विस्तारित (किया जाता है)।

व्याकरण—कृतारिड्वर्गजयेन—षण्णां वर्गः षड्वर्गः, अरीणां षड्वर्गः, अरिषड्वर्गः कृतः अरिषड्वर्गस्य जयः येन सः तेन कृतारिषड्वर्गजयेन। यहाँ पर शिवभागवत समास हुआ है जैसे भगवतोऽयं भागवतः शिवस्य भागवतः शिवभागवतः।

अगम्यरूपाम्=न गम्यं रूपं यस्याः सा अगम्यरूपा ताम् अगम्यरूमाम् मानवीम्=मनोः इयं मानवी ताम् मानवीम् मनु+अण्+ङीप्। मनु को सम्पूर्ण शास्त्रों का पूर्ण ज्ञान था। इसी कारण उन्हें मनु कहा जाता है; जैसा मनुस्मृति के टीकाकार कुल्लूकभट्ट ने कहा है कि "सकलवेदार्थमननात् मनुः"।

पद्धतिम्=अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः। सरणिः पद्धतिः पद्या वर्त्तन्येकपदीति च" इत्यमरः।

प्रपित्सुना=प्रपत्तुमिच्छुः तेन प्रपित्सुना।

अस्ततन्द्रिणा—अस्ता तन्द्रिः यस्य सः अस्ततन्द्रिः तेन अस्ततन्द्रिणा। स्यान्निद्रा शयनं स्वापः संवेश इत्यपि। तन्द्री प्रमीला।" इत्यमरः।

नक्तन्दिवम्=नक्तं च दिवा च नक्तंदिवम् यहाँ पर 'अचतुरविचतुर'=सूत्र से समासान्त अच् प्रत्यय का प्रयोग हुआ है।

विभज्य=वि+भज्+क्त्वा+ल्यप्।

पौरुषम्—पुरुषस्य इदं पौरुषम्। पुरुष=अण्।

छन्द—वंशस्थ।

विशेष—काम, क्रोध, लोभ, मोह, मद, मात्सर्य यह ६ मनुष्य के आन्तरिक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शत्रु होते हैं। इन पर विजय प्राप्त करना मानवमात्र का कर्तव्य होता है, विशेष कर राजाओं के लिए तो इनको वश में रखना आवश्यक होता है। दुर्योधन बाह्य आडम्बर से इन सब को अपने वश में किये हुए हैं। इस प्रकार प्रजा को अपने में अनुरक्त करना चाहता है।

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः।
स संततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥१०॥

अन्वय—गतस्मयः सः, सन्ततम्, अनुजीविनः, प्रीतियुजः सखीन् इव, सुहृदः, च, बन्धुभिः, समानमानान्, बन्धुतां कृताधिपत्याम्, इव, साधु, दर्शयते ॥

वाच्यान्तरम्—गतस्मयेन तेन, अनुजीविनः प्रीतियुजः सखाय इव दृश्यन्ते। सुहृदः बन्धुभिः समानमाना इव दर्श्यन्ते। बन्धुता कृताधिपत्या इव दर्श्यते ॥

सखीनिवेति। गतस्मयो निरहङ्कारोऽत एव स दुर्योधनः सन्ततमनारतं साधु सम्यक्। अकपटमित्यर्थः। अनुजीविनो भृत्यान्। प्रीतियुजः स्निग्धान्सखीनिव मित्राणीव दर्शयते। लोकस्येति शेषः। 'हेतुमति च' इति णिच्। 'णिचश्च' इत्यात्मनेपदम्। शोभनं हृदयं येषां तान्सुहृदो मित्राणि च ' सुहृद्दुर्हृदौ मित्रामित्रयोः इति निपातः। बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान् दर्शयते। बन्धूनां समूहो बन्धुता ताम्। 'ग्रामजनबन्धुसहायेभ्यस्तल्'। कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते। बन्धूनधिपतीनिव दर्शयतीत्यर्थः। भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान्सम्भावयतीत्यर्थः। अनुजीव्यादीनाम् कर्तुरीप्सिततमं कर्म इति कर्मत्वम्। पूर्वं त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति—स राजाऽनुजीव्यादीन् सख्यादीनिव दर्शयते। सख्यादय इव ते तु तं पश्यन्ति। सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते स्वयमेव छन्दानुवर्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः। अर्थात्तस्येप्सितकर्मत्वम्। 'अभिवादिदृशोरात्मनेपदे वेति वाच्यम्' इति पाक्षिकं कर्मत्वम्। एवं चात्राण्यन्तकर्मणो राज्ञो ण्यन्ते कर्तृत्वेऽपि 'आरोहयते हस्ती स्वयमेव' इत्यादिवदश्रूयमाणकर्मान्तरत्वाभावान्नायं णेरणादिसूत्रस्य विषय इति मत्वा 'णिचश्च' इत्यात्मनेपदं प्रतिपेदिरे। भाष्ये तु प्रेरणादिसूत्रविषयत्वमप्यस्योक्तम्। यथाह—पश्यन्ति भृत्या राजा नम् 'दर्शयते, भृत्यान् राजा', 'दर्शयते भृत्यं राजा' अत्रात्मनेपदं सिद्धं भवति इति। अत्राह कैयटः—ननु कर्मान्तरसद्भावादत्रात्मनेपदेन भाव्यम्। उच्यते—अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय ऊह्यते। अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावात्लेपदं न भवति। यथा—'स्थलमारोहयति मनुष्यान्' इति। इह त्वण्यन्तावस्थायां कर्तृणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदमिति।

अर्थ—अपने समस्त राजस्व के अहङ्कार का परित्याग करते हुए वह दुर्योधन स्नेही मित्रों के समान नौकरों के साथ व्यवहार करता है। साथ ही अभिन्न मित्रों से भाई के समान व्यवहार करता है और अपने भाइयों को शासन करते हुए-सा दिखाता है।

—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याख्या—गतस्मयः=गर्वरहितः (अहङ्काररहित) सः=दुर्योधनः (वह दुर्योधन) सन्ततम्=निरन्तरम् (सर्वदा, सदैव) अनुजीविनः=सेवकान् (नौकरों को) प्रीतियुजः=स्नेहयुक्तान् (अत्यन्त स्नेही) सखीनिव=मित्राणि इव मित्रों के समान) साधु=सम्यक् (ठीक प्रकार से) दर्शयते=पश्यति (देखता है) सुहृदश्च=मित्राणि च (मित्रों को) बन्धुभिः=निजपरिवारैः (अपने भाई बान्धवों के समान) समानमानान्=तुल्य-सत्कारान् (बराबर व्यवहार पूर्ण आदर) बन्धुताम्=परिवारसमूहम् (अपने परिवार वालों को) कृताधिपत्याम्=विहितसर्वाधिकराम् (समस्त अधिकारों से युक्त) अपने समान ही लोगों को दिखलाता है)

व्याकरण—१. गतस्मयः=गतः स्मयो यस्य स गतस्मयः । बहुव्रीहि । २. सन्ततम्=सम्+तन्+क्त सन्ततम् सम् पूर्वक तन् धातु से क्त प्रत्यय होने पर 'समो वा ततहितयोः' वार्तिक से तत और हित बाद में रहने पर उपसर्ग सम् के 'म्' का विकल्प से लोप हो जाता है। तन् के 'न्' का लोप 'अनुदात्तादेश्च' सूत्र से हो जाता है।

अनुजीविनः=अनु पश्चाद् जीवनं येषां ते अनुजीविनः तान् अनुजीविनः । अनु+जीव्+णिनि । यह दर्शयते क्रिया का कर्म है।

प्रीतियुजः=प्रीत्या युञ्जन्ति ये ते प्रीतियुजः तान् प्रीतियुजः । प्रीति+युज्+क्विन् ।

सुहृदः=सुष्ठु शोभनं हृदयं येषां ते सुहृदः तान् सुहृदः । 'सुहृद्दुर्हृदौ मित्रा-मित्रयोः' सूत्र से हृदय के स्थान पर हृदादेश होता है।

बन्धुभिः=बध्नन्ति प्रेम्णा इति बन्धवः तैः बन्धुभिः । बन्ध्+उण् ।

समानमानान्=समानो मानो येषां ते समानमानाः तान् समानमानान् ।

बन्धुताम्=बन्धूनां समूहः बन्धुता ताम् बन्धुताम् । बन्धु+तल् ।

कृताधिपत्याम्=अधिपाति इति अधिपतिः अधिपतेः कर्म आधिपत्यम् । कृतम् आधिपत्यं यस्याः सा ताम् कृताधिपत्याम् ।

दर्शयते=दृश्+णिच् लट् ते आत्मनेपद ।

छन्द—वंशस्थ ।

विशेष—राज्य प्राप्त करने के अनन्तर दुर्योधन अपने को परिवर्तित करने लगा। वह जानता था कि युधिष्ठिर आदि के प्रति प्रजा का बड़ा स्नेह है। यदि मेरे दुष्कृत्यों का उद्घाटन हो गया तो विद्रोह हो जाने की आशङ्का है। इसी कारण वह सबसे स्नेहपूर्ण व्यवहार रखता है। वह अभिमान का परित्याग कर अपने समस्त परि-वार के साथ तथा सेवकवर्ग के साथ सद्व्यवहार करता है। वह सेवकों के साथ मित्रों के समान व्यवहार करता है। यह शङ्का होती है कि यदि वह मित्रों के समान सेवकों को मानता है तो मित्रों के साथ कैसा व्यवहार करता है। इसके उत्तर में वह सखाओं को भाइयों के समान और भाइयों को तो राज्य का अधिकार देकर अपने समान ही मानता है। इस प्रकार उसने अपने सुन्दर आचरणों से सबके मन को जीत लिया है॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ॥११॥

अन्वय—यथायथं, विभज्य, समपक्षपातया, भक्त्या, असक्तम्, आराधयतः, अस्य, गुणानुरागात् सख्यम्, ईयिवान् इव त्रिगणः परस्परं न बाधते ॥

वाच्यान्तरम्—यथायथं विभज्य समपक्षपातया भक्त्या असक्तमाराधयतोऽस्य गुणानुरागात् सख्यमीयुषा इव त्रिगणेन परस्परं न बाध्यते ॥

असक्तमिति। यथायथं यथास्वं विभज्य असंकीर्णरूपं विविच्येत्यर्थः। 'यथास्वे यथायथम्' इति निपातनाद् द्विर्भावो नपुंसकत्वं च। ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वम्। पक्षे पातः पक्षपात आसक्तिविशेषः समस्तुल्यो यस्यां तया समपक्षपातया। भक्त्याऽनुरागविशेषेण पूज्येष्वनुरागो भक्तिरित्युपदेशः। पूज्यश्चायं त्रिवर्ग इति। असक्तमनासक्तम्। अव्यसनितयेति यावत्। आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रयाणां धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः 'त्रिवर्गो धर्मकामार्थैः चतुर्वर्गः समोक्षकैः' इत्यमरः। गुणानुरागात् तदीयगुणेष्वनुरागात्। गुणवदाश्रयलोभादित्यर्थः। सख्यं मैत्रीम्। 'सख्युयः' इति य प्रत्ययः। उपेयिवानुपगतवानिवेत्युत्प्रेक्षा। 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः "नात्रोपसर्गस्तन्त्रम्' इति काशिकाकार आह स्म। परस्परं न बाधते। समवर्तित्वादस्य 'धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त इत्यर्थः। उक्तं च—'धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः' इति ॥

अर्थ—यथायोग्य समुचित रूप से समय को विभक्त करके, बराबर प्रेम से किसी के वश में न होकर सेवा करते हुये दुर्योधन के गुणों के प्रेम के कारण मित्रता को प्राप्त हुये के समान धर्म, अर्थ, काम यह त्रिगण एक दूसरे का विरोध नहीं करते थे। अर्थात् उस दुर्योधन ने धर्मानुष्ठान के लिए, राजकार्य के लिए, गृहस्थ-सुख तथा विश्राम के लिए यथायोग्य समय नियत कर रखे थे जिसके कारण कोई बाधा नहीं होती थी।

व्याख्या—यथायथम्=यथायोग्यम्, (समुचित रूप से) विभज्य=विभागं कृत्वा (विभाग करके) समपक्षपातया=तुल्यव्यवहारेण (पक्षपात रहित बराबर प्रेम से) भक्त्या=स्नेहेन (प्रेम से) असक्तम्=(अनासक्त रूप में) आराधयतः=सेवमानस्य (सेवन करते हुए) अस्य=दुर्योधनस्य (दुर्योधन के) त्रिगणः=धर्मार्थकामाः (धर्म, अर्थ और काम) गुणानुरागात्=गुणपक्षपातात् (गुणों के प्रेम से) सख्यम्=मैत्रीम् (मित्रता को) ईयिवानिव=प्राप्तवानिव (प्राप्त हुए के समान) परस्परम्=अन्योन्यम् (एक दूसरे का) न बाधते=न पीडयति (विरोध नहीं करते हैं) ॥

व्याकरण—यथायथम्='यथार्थं तु यथायथम्' इति अमरकोषः। जब यथा शब्द वीप्सा को सूचित करता है तो 'यथास्वम्' इस अर्थ को व्यक्त करने के कारण 'यथास्वे यथायथम्' इस सूत्र से द्वित्व निपातन होकर नपुंसक लिङ्ग में प्रयुक्त होता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

है। फलतः 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इस सूत्र से अन्तिम आकार का ह्रस्व हो जाता है। यह अव्यय नहीं है॥

विभज्य=वि+भज्+क्त्वा—ल्यप्। यह यथायथम् का विशेष्य है॥

समपक्षपातया=पक्षे पातः पक्षपातः समः पक्षपातो यस्यां या समपक्षपाता तया समपक्षपातया।

भक्त्या=भज्+क्तिन्=भक्तिः तया भक्त्या।

असक्तम्=सञ्ज्+क्त=सक्तम्=न सक्तम् असक्तम् असक्तम् यथा स्यात् तथा। यह क्रिया आराधयतः का विशेषण है।

गुणानुरागात्=गुणेषु गुणानां वा अनुरागः गुणानुरागः तस्मात् गुणानुरागात्।

सख्यम्=सख्युः भावः सख्यम्। 'सख्युर्यः' से 'य' प्रत्यय होता है।

त्रिगणः=त्रयाणां गणः त्रिगणः (त्रिवर्गः धर्मार्थकामः)

परस्परम्—अन्योन्यम् परम् परम् इति परस्परम्। "कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्" इस वार्तिक से समास तथा कम 'परम्' को द्वित्व हो गया। वार्तिक का अर्थ है कि कर्म के व्यतिहार अर्थात् विनिमय सूचित करने के लिए सर्वनाम को द्वित्व हो जाता है और समास भी प्रायः कर दिया जाता है। यह कहीं पर नहीं भी होता। इस वार्तिक में प्रयुक्त 'बहुलम्' इस पद से प्रतीत होता है, क्योंकि बहुलम् का यही अर्थ है कि कहीं पर प्रयुक्त हो और कहीं पर न हो। यहाँ पर परं क्रिया का व्यतिहार है अतः बहुल पद के ग्रहण से 'परंपरम्' भी प्रयोग होता है। परन्तु "अन्यपरयोः न समासवत्" इस पाणिनि-नियम से अन्य और पर को समास नहीं होता। समास न होने पर 'सुप्' को सु हो गया फलतः सु को विसर्ग और विसर्ग को स् होकर 'परस्परम्' सिद्ध होता है। इसी प्रकार अन्योन्यम् भी सिद्ध होता है। "मिथोऽन्योऽन्यम् परस्परम्" यह कोष है।

छन्द—वंशस्थ "जतौ तु वंशस्थमुदीरितं जरौ"

विशेष—शास्त्र का कथन है कि 'धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः सजनो जघन्यः' अर्थात् धर्म, अर्थ और का काम का बराबर सेवन करना चाहिए जो व्यक्ति एक ही के सेवन में आसक्त रहता है वह निन्दनीय है। अतः कुशल शासक का यह परम कर्तव्य है कि इन तीनों का सेवन समान रूप से करे। दुर्योधन इसी प्रकार का शासक है। अतः जब वह धर्म का सेवन करता है तो और अर्थ काम बाधा नहीं पहुँचाते। इसी प्रकार जब वह अर्थ का सेवन करता है तो धर्म और काम बाधक नहीं होते। यही क्रम काम के सेवन करते समय भी है। अतः वनेचर युधिष्ठिर से कहता है कि वह दुर्योधन इस समय समदर्शी होकर योग्यतापूर्वक शासन करता है।

निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया॥१२॥

अन्वय—तस्य, निरत्ययं, दानवर्जितं, साम, न (प्रवर्तते) सत्क्रियां विरहय्य, भूरि, दानं, न (प्रवर्तते)। विशेषशालिन्या सत्क्रियया गुणानुरोधेन विना न प्रवर्तते॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाच्यान्तरम्—निरत्ययेन साम्ना दानवर्जितेन न (प्रवर्तते) सत्क्रियां विरहय्य भूरिणा दानेन न (प्रवर्तते)। विशेषशालिनी सत्क्रियया गुणानुरोधेन विना न प्रवर्तते ॥

निरत्ययमिति। तस्य दुर्योधनस्य निरत्ययं निर्बाधम्। अमायिकमित्यर्थः। अन्यथा जनानां दुर्ग्रहत्वादिति भावः। साम सान्त्वम्। 'साम सान्त्वमुभे समे' इत्यमरः। दानवर्जितं न प्रवर्तते। अन्यथा लुब्धाच्चावर्जनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः। उक्तं च—'लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्मणा। मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम् ॥' इति। यथा भूरि प्रभूतम् न तु कदाचित्स्वल्पमित्यर्थः। दानं धनत्यागः। सदित्यादरार्थेऽव्ययम् 'आदरानादरयोः सदसती' इति निपातसंज्ञास्मरणात्। तस्य क्रियां सत्क्रियां विरहय्य विहाय। 'ल्यपि लघुपूर्वात्' इत्ययादेशो न प्रवर्तते। अनादरे दानवैफल्यादिति भावः। नचैवं सर्वत्रनयेनाविवेकित्वं कोशहानिश्च स्यादित्याह-प्रेति। विशेषशालिन्यतिशयोगिनी सत्क्रियाऽऽदरक्रिया गुणानुरागेण विना न प्रवर्तते।

पृथग्विना—इत्यादिना तृतीया। गुणेष्वादरो भूरिदानं चेति नोक्तदेशावकाश इत्यर्थः। अत्रोत्तरस्य पूर्वपूर्व—विशेषणतया स्थापनादेकावल्यलङ्कारः। तदुक्तं काव्यप्रकाशे 'स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परं परम्। विशेषणतया वस्तु यत्र सैकावली द्विधा'।

अर्थ—दुर्योधन की सान्त्वनापूर्ण मधुर वाणी बिना दान के नहीं होती, दान भी सत्कारपूर्वक ही होता है और सत्कार भी गुण और योग्यता के अनुसार ही होता। तात्पर्य यह है कि वह केवल मधुर वचनों से अपना कार्य नहीं करता अपितु दान भी देता है, दान सत्कारपूर्वक और सत्कार योग्यतानुसार ही करता है।

व्याख्या—तस्य=दुर्योधनस्य (दुर्योधन की) निरत्ययम्=निर्विघ्नम् (बिना किसी प्रकार के विघ्न से अर्थात् बाधा रहित) दानवर्जितम्=दानशून्यम् (धन प्रयोग के बिना) साम=प्रियवचनम् (मधुरवाणी) सत्क्रियाम्=आदरम् (आदर को) विरहय्या=विहाय (त्याग करके) भूरि=बहुलम् (अधिक) दानम्=धन प्रयोगः (धन का वितरण) विशेषशालिनी=प्रशंसनीया (प्रशंसा योग्य) सत्क्रिया=सत्कारः (सत्कार) गुणानुरोधेन विना=गुणानुरागेण विना (गुणों की योग्यता के बिना) न प्रवर्तते=न भवति (नहीं होता) है ॥

व्याकरण—निरत्ययम्=निर्गतः अत्ययो यस्मात् तद् निरत्ययम् निर्+अति+इ धातु से अच् प्रत्यय होकर यह प्रयोग सिद्ध होता है "अत्ययोऽति क्रमे कृच्छ्रे दोषे दण्डेऽप्ययापदि" इति कोशः।

दानवर्जितम्=दानेन वर्जितम् दानवर्जितम्। दा+ल्युट्=दानम्। वृज्+णिच्+क्त=वर्जितम्।

विरहय्य=वि+रह+णिच्+ल्यप्।

विशेषशालिनी=विशेषेण शालते शोभते या सा विशेषशालिनी।

गुणानुरोधेन=गुणानामनुरोधः गुणानुरोधः तेन गुणानुरोधेन। यहाँ पर बिना के योग में 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' से तृतीया विभक्ति हुई। 'अनुरोधोऽनुवर्त्तनम्' यह कोशवचन है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छन्द—वंशस्थ ।

अलंकार—एकावली । जहाँ पूर्व पूर्व वाक्य के प्रति उत्तर उत्तर वाक्य विशेषण रखे जायें वहाँ एकावली अलङ्कार होता है "स्थाप्यतेऽपोह्यते वापि यथा पूर्वं परं परम् । विशेषणतया वस्तु यत्र सैकावली द्विधा ॥" काव्यप्रकाशे ॥

विशेष—वनेचर कहता है कि राजनीतिशास्त्र का कुशल पण्डित दुर्योधन इस समय जैसा अवसर देखता है उसी प्रकार अपना अस्तित्व अक्षुण्ण रखने का प्रयास करता है । वह मधुरवाणी तथा अत्यधिक दानपूर्वक प्रजा के हृदय को अपनी ओर आकर्षित करना चाहता है । पर यह दान सम्मानपूर्वक करता है जिससे सभी उसके गुणों तथा नम्र स्वभाव की प्रशंसा करें । वह दुर्योधन गुणों को जानने वाला है, अतः योग्यतानुसार योग्य व्यक्तियों का सत्कार करता है अयोग्य व्यक्तियों का नहीं । इस समय वह इस नीति का पालन अक्षरशः कर रहा है ।

लुब्धमर्थेन गृह्णीयात् साधुमञ्जलिकर्मणा ।
मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम् ॥

वसूनि वाञ्छन् न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥१३॥

अन्वय—वशी, सः (दुर्योधनः), वसूनि वाञ्छन् न, मन्युना न, निवृत्तकारणः (सन्) स्वधर्मः एव (एक) इति, गुरूपदिष्टेन दण्डेन रिपौ वा सुते अपि धर्मविप्लवं निहन्ति ॥

वाच्यान्तरम्—वशिना तेन, वसूनि वाञ्छता न, मन्युना न, स्वधर्म एवेति निवृत्तकारणेन (दुर्योधनेन) गुरूपदिष्टेन दण्डेन रिपौ सुतेऽपि वा धर्मविप्लवो निहन्यते ।

वसूनीति । वशी दुर्योधनो वसूनि धनानि वाञ्छन्न । लोभान्नेत्यर्थः । 'वसु तोये धने मणौ' इति वैजयन्ती । निहन्तीति शेषः । तथा मन्युना कोपेन न च । "मनुर्दैन्ये क्रतौ क्रुधि" इत्यमरः । "धर्मं शास्त्रानुसारेण क्रोधलोभविवर्जितः" इति स्मरणादित्यर्थः । किन्तु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन्स्वधर्म इत्येव । स्वस्य राज्ञः, सतो ममायं धर्मो ममेदं कर्त्तव्यमित्यस्मादेव हेतोरित्यर्थः "अदण्ड्यान्दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छति ।" इति स्मरणादिति भावः । गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन । 'धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः । समाहितमतिः पश्येद् व्यवहारानुक्रमात् ।' इति नारदस्मरणात् । दण्डेन दमेन । शिक्षयेत्यर्थः । रिपौ सुतेऽपि वा । स्थितमिति शेषः । एतेनास्य समदर्शित्वमुक्तम् । धर्मविप्लवं धर्मव्यतिक्रमम् । अधर्ममिति यावत् । निहन्ति निवारयति । दुष्ट एवास्य शत्रुः शिष्टः एव बन्धुः । न तु सम्बन्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः ।

अर्थ—अपने अधीन सबको रखने वाला यह जितेन्द्रिय दुर्योधन, न तो धन एकत्र करने की इच्छा से, और न क्रोध के कारण ही किसी को कुछ दण्ड देता है । अपितु दुष्ट अपराधियों को दण्ड देना मेरा धर्म है यह समझकर वह लोभ और क्रोध

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

से निवृत्त होकर गुरु, धर्माधिकारियों के उपदेश के अनुसार चाहे शत्रु हो अथवा पुत्र ही क्यों न हो वह सब पर समदृष्टि रखता हुआ जिसको अन्यायी समझता है उसे दण्ड देता है। न्याय के सामने शत्रु और पुत्र उसके लिये समान हैं।

व्याख्या—वशी=जितेन्द्रियः (इन्द्रियों को वश में रखने वाला, सबको अपने अधीन रखने वाला) सः=दुर्योधनः (वह दुर्योधन) वसूनि=धनानि (धन को) वाञ्छन्=इच्छन् (चाहता हुआ) न=नैव (नहीं) मन्युना=क्रोधेन (क्रोध से) न=नैव (नहीं) निवृत्तकारणः=कारणरहितः (लोभ, क्रोध आदि कारणों से रहित) स्वधर्मः एव इति=राजधर्म एव अयमिति (यह राजधर्म है ऐसा सोचता हुआ) गुरूपदिष्टेन=मनूपदिष्टेन (मनु आदि शास्त्रकारों के उपदेश द्वारा) दण्डेन=शासनेन (शासन से) रिपौ=शत्रौ (शत्रु में) सुते=पुत्रे (पुत्र में भी) धर्मविप्लवम्=धर्मविरुद्धम् (धर्म की मर्यादा का अतिक्रमण करने वाले को) निहन्ति=दण्डयति (दण्ड देता है)।

व्याकरण—वशी—वशः अस्ति अस्य इति वशिन् प्रथमा एकवचन वशी वश+इनि प्रत्यय होकर वशी-वशिनौ-वशिनः।

वसूनि—नपुसंक लिङ्ग "वसु तोये धने मणौ" इति कोशः।

वाञ्छन्—वाञ्छति इति वाञ्छन्। वाञ्छ्+शतृ=वाञ्छन्।

निवृत्तकारणः—निवृत्तानि कारणानि यस्मात् स निवृत्तकारणः। नि+वृत्+क्त=निवृत्तः, कृ+णिच्+ल्युट्=कारणम्, "हेतुर्ना कारणं बीजं निदानं त्वादि-कारणम्" इत्यमरः।

स्वधर्मः—स्वस्य धर्मः स्वधर्मः।

गुरूपदिष्टेन—गुरुणा उपदिष्टः गुरूपदिष्टः तेन गुरूपदिष्टेन। उप+दिश+क्त=उपदिष्टः।

दण्डेन—दण्डयते अनेन इति दण्डः तेन दण्डेन।

धर्मविप्लवम् धर्मस्य विप्लवः धर्म विप्लवः तम् धर्म विप्लवम्। ध्रियते अनेन इति धर्मः धृ+मन्=धर्मः। वि+प्लु+अप्=विप्लवः।

विशेष—राजा दुर्योधन अपने न्याय के बल पर सभी प्रजा को अपने वश में रखता है साथ ही वह अपनी इन्द्रियों पर भी पूर्ण अधिकार रखता है। इस प्रकार वह वशी दुर्योधन यह अच्छी प्रकार जानता है कि राज्य न्याय पर ही आधारित रहता है। अतः वह पक्षपात रहित शत्रु तथा मित्र एवम् अपने पुत्र पर निष्पक्ष रूप व्यवहार करता है। यदि वह प्रजा को किसी प्रकार का दण्ड देता है तो धन-प्राप्ति की इच्छा नहीं रहती और न वह किसी पर असन्तुष्ट होकर ही क्रोध पूर्वक दण्ड देता है उसका एक मात्र उद्देश्य राज्य-शासन-व्यवस्था को ठीक रखना है। राज्य-शासन-व्यवस्था में यदि राजा दण्डनीय को दण्ड न देकर अदण्डनीय को दण्ड देता है तो अयश तथा अपनित होता है। स्मृति के अनुसार भी "अदण्डयान् दण्डयन् राजा दण्ड्यांश्चैवाप्य-दण्डयन्। अयशो महदाप्नोति नरकं चैव गच्छति॥" नारद ने भी कहा है कि "धर्म-शास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः। समाहितमतिः पश्येत् व्यवहाराननुक्रमात्" ॥ १३ ॥

--

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

81-83

विधाय रक्षान्परितः परेतरानशङ्कितताकारमुपैति शङ्कितः।
क्रियाऽपवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥१४॥

अन्वय—शङ्कितः (सन्नपि) परितः, परेतरान् रक्षान् विधाय, अशङ्किताकारम् उपैति। क्रियाऽपवर्गेषु, अनुजीविसात्कृताः सम्पदः, अस्य कृतज्ञतां वदन्ति ॥१४॥

वाच्यान्तरम्—शङ्कितेन तेन परितः परेतरान् रक्षान् विधाय अशङ्किताकारम् उपेयते, क्रियाऽपवर्गेषु अनुजीविसात्कृताभिः सम्पद्भिरस्य कृतज्ञता उच्यते।

विधायेति। शंका सञ्जातास्य शङ्कितोऽविश्वस्तः सन्परितः सर्वत्र स्वपरमन्डले परेतरानात्मीयान्। अवञ्चकानिति यावत्। यद्वा परानितरयन्ति भेदेनात्मसात्कुर्वन्ति इति परेतरान्। 'तत्करोतीति' ण्यन्तात्कर्मण्यण् प्रत्ययः। रक्षन्तीति रक्षान् रक्षकान्। मन्त्रगुप्तिसमर्थानित्यर्थः। 'नन्दिग्रही—'त्यादिना पचाद्यच्। विधाय कृत्वा। नियुज्येत्यर्थः। अशङ्किताकारमुपैति। स्वयमविश्वस्तोऽपिविश्वस्तवदेव व्यवहरन्परमुखेनैव परान् भिनत्तीत्यर्थः न तान्रक्षानुपेक्षेते येन तेऽपि विकुर्वीरन्नित्याह—क्रियेति क्रियाऽवपर्गेषु कर्ममसाप्तिष्वनुजीविसात्कृता भृत्याधीनाः कृताः अपरावर्तितया दत्ता इत्यर्थः। 'देये त्रा च' इति साति प्रत्ययः। सम्पदोऽस्य राज्ञः कृतज्ञतामुपकारित्वं वदन्ति। प्रीतिदानैरेवास्य कृतज्ञत्व प्रकाश्यते, न तु वाङ्मात्रेणेत्यर्थः। कृतज्ञे राजन्यनुजीविनोऽनुरज्यन्तेऽनुरक्ताश्च तं रक्षन्तीति भावः।

अर्थ—वह दुर्योधन हर समय सशङ्कित रहता हुआ भी चारों ओर अपने विश्वासी रक्षकों को नियुक्त कर स्वयम् निर्भय-सा रहता है। कार्यों की समाप्ति पर सेवकों को दी गई सम्पत्ति ही इसकी कृतज्ञता को व्यक्त करती है ॥

व्याख्या—शङ्कितः=सन्देहशीलः सन् (किसी पर विश्वास न करता हुआ) परितः =सर्वतः (चारों ओर अपने राष्ट्र में तथा परराष्ट्र में) परेतरान्=स्वकीयान् (अपने विश्वसनीय लोगों को) अथवा परेतरान्=भेदनीतिनिपुणान् (भेदनीति में चतुर लोगों को) रक्षान्=रक्षकान् (रक्षा करने वालों को) विधाय=कृत्वा (करके) अशङ्किताकारम्=निर्भयम् (निर्भय के समान) उपैति=प्राप्नोति (व्यवहार करता है)। क्रियापवर्गेषु=कार्यसमाप्तिषु (कार्य की समाप्ति होने पर) अनुजीविसात्कृताः=अनुचरायत्तीकृताः (सेवकों को दी हुई) सम्पदः=धनानि। (सम्पत्तियाँ अस्य=दुर्योधनस्य (राजा दुर्योधन की) कृतज्ञताम्=उपकारज्ञताम् (कृतज्ञता) वदन्ति=प्रकटयन्ति (कहते हैं)।

व्याकरणम्—शङ्कितः—शङ्का सञ्जाता अस्य इति शङ्कितः।

परेतरान्=परेभ्यः इतरेपरेतरे तान् परेतरान्। इस शब्द की व्युत्पत्ति इस प्रकार भी की जाती है परान् शत्रून् इतरयन्ति पृथक् कुर्वन्ति इति परेतराः तान् परेतरान्। इसका अर्थ यह होगा कि भेदनीति से चतुर तथा शत्रु के मित्रों को अपनी ओर आकर्षित करने वाले।

रक्षान्—रक्षन्ति इति रक्षाः तान् रक्षान्। रक्ष+अच्। इसका अर्थ यह है कि कौन व्यक्ति किस अभिप्राय से क्या कार्य करता है इस बात को गुप्त रीति से ज्ञात करने वालों को।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधाय—वि+धा+क्त्वा—ल्यप्

अशङ्कितःकारम्—शङ्का सञ्जाता अस्य शङ्कितः न शङ्कितः अशङ्कितः अशङ्कितः आकारोऽशङ्किताकारः तम् अशङ्किताकारम् । आ+कृ+घञ्+आकारः ।

क्रियापवर्गेषु—क्रियायाः अपवर्गः क्रियापवर्गः तेषु क्रियापवर्गेषु । अप-वृज्+णिच्+घञ् अपवर्गः । यहाँ पर 'क्रियावर्गेषु सत्सु' इस अर्थ के अनुसार "यस्य च भावेन भावलक्षणम्" सूत्र से सप्तमी हुई ।

अनुजीविसात्कृताः—अनुजीविनाम् अधीनाः कृताः अनुजीविसात्कृताः । अनु+जीव्+णिनि । कृ+क्त+टाप् स्त्रियाम् कृता । यहाँ पर "देये त्रा च" इस सूत्र से साति प्रत्यय होता है ।

कृतज्ञताम्—कृतं जानाति इति कृतज्ञः, कृतज्ञस्य भावः कृतज्ञता ताम् । कृत+ज्ञा+क=कृतज्ञ+ताम+टाप् ॥

विशेष—राजनीति में साम, दाम, दण्ड, भेद इन चार नीतियों का प्रयोग करना आवश्यक होता है । इसी कारण द्यूत के द्वारा जीती हुई वसुधा पर राज्य करने के लिये वह दुर्योधन जब किसी ओर शंकित होता है तो उनके भेद को जानने के लिए अपने विश्वासपात्र भृत्यों गुप्तचरों को नियुक्त करता है । स्वयं वह दुर्योधन मन्त्री सेना अन्तःपुर स्वराष्ट्र तथा परराष्ट्र में तथा अपने अनुजीवियों पर अविश्वस्त होता हुआ भी विश्वास-सा करता है । या शत्रु तथा मित्रों में अविश्वस्त होता हुआ भी उनके साथ विश्वासपूर्ण व्यवहार करता हुआ भेदनिपुण अपने गुप्तचरों के द्वारा उन्हें भेदित करता है । स्वयं कुछ न जानते हुए के समान व्यवहार करता है । भृत्य लोग पुरस्कार-प्राप्ति के लोभ से दत्तचित्त होकर बड़ी लगन से कार्य को पूरा करने का प्रयास करते रहते हैं ॥ १४ ॥

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसम्पदः ॥१५॥

अन्वय—तेन पदेषु सम्यग् विभज्य लम्भिताः विनियोगसत्क्रियाः, उपायाः संघर्षम्, उपेत्य इव, परिबृंहितायतीः, अर्थसम्पदः, अनारतम्, फलन्ति ॥

वाच्यान्तरम्—विनियोगसत्क्रियैरुपायैरर्थसम्पद. फल्यन्ते ॥

अनारतमिति । तेन राज्ञा पदेषूपादेयवस्तुषु । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । सम्यगसंकीर्णमव्यस्तं च विभज्य विविच्य । विनियोग एवं सत्क्रियाऽनुग्रहः । सत्कार इति यावत् । यासां ताः लम्भिताः स्थानेषु सम्यक् प्रयुक्ता इत्यर्थः । उपायाः सामादयः । संघर्ष परस्परस्पर्धामुपेत्येवेत्युत्प्रेक्षा । परिबृंहितायतीः प्रचितोत्तर-कालाः । स्थिरा इत्यर्थः । अर्थसम्पदीऽनारतमजस्रं फलन्ति । प्रसुवत इत्यर्थः ॥

अर्थ—वह दुर्योधन प्रत्येक विषयों में जो साम, दाम, दण्ड, भेद उपायों को लगाता है वे मानो एक दूसरे से स्पर्धा रखते हुए के समान भविष्य में उन्नतिशील होकर अनेक प्रकार की सम्पत्तियाँ फलती हैं अर्थात् उसे प्रत्येक कार्य में सफलता तथा लाभ ही होता है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याख्या—तेन=राज्ञा दुर्योधनेन (राजा दुर्योधन के द्वारा) पदेषु=वस्तुषु (योग्य स्थान पर) सम्यक्=यथायथम् (अच्छी प्रकार से) विभज्य=विभागं कृत्वा (विभाग करके) लम्भिता=सम्यक् प्रयुक्ताः (स्थान पर ठीक प्रकार से प्रयुक्त) विनियोगसत्क्रियाः=समुचितप्रयोगसत्काराः (समुचित यथायोग्य सत्कार को प्राप्त हुए) उपायाः=सामदानादयः (साम, दाम, दण्ड, भेद आदि) संघर्षम्=परस्परस्पर्धाम्= (परस्पर एक दूसरे से स्पर्धा को) उपेत्य=प्राप्य (प्राप्त करके) परिबृंहितायतीः= परिवर्द्धितोत्तरकालाः (भविष्य में उन्नति को देने वाली) अर्थसम्पदः=धनसम्पत्तीः (धन सम्पत्ति आदि) अनारतम्=निरन्तरम् (लगातार अहर्निश) फलन्ति=सिद्धयन्ति (सिद्ध होते हैं)।

व्याकरणम्—पदेषु—पद शब्द का प्रयोग कोष के अनुसार "पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु" अर्थों में होता है। यहाँ पर 'वस्तु' अर्थ में हुआ है।

सम्यक्—सम्+अञ्च्+क्विन्=सम्यक् 'अञ्च्' धातु के रहने पर सम् के स्थान पर समि आदेश हो जाता है।

विभज्य—वि+भज्+क्त्वा—ल्यप्।

लम्भिता=लभ+णिच्+क्त। यहाँ पर 'लभेश्च' सूत्र से नुमागम हो गया।

विनियोगसत्क्रियाः—विनियोग एव सत्क्रिया यासां ताः विनियोगसत्क्रियाः वि+नि+युज्+घञ्।

उपायाः—उपैति उपायते वा एभिः इतिः उपायाः। उप+इ+अच्।

संघर्षम्—सम्+घृष्+घञ् (भाव में)।

उपेत्य—उप्+इ+क्त्वा—ल्यप्।

परिबृंहितायतीः—परिबृंहिता आयतिः यासां ताः परिबृंहितायतीः। आयति शब्द का प्रयोग भविष्य काल के लिए मेदिनी कोष के अनुसार किया जाता है "आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागमिकालयोः।" परि+बृंह्+णिच्+क्त। आ+यम्+क्तिन्=आयतिः—आ+या+डति=आयतिः।

अर्थसम्पदः—अर्थानाम् सम्पदः ताः अर्थसम्पदः। सम्+पद्+क्विप् भावे= सम्पदः।

अनारतम्—न आरतम् अनारतम्। आ+रम्+क्त। इसका प्रयोग कोश के अनुसार "सततानारताश्रान्तसन्तताविरतानिशम्" अर्थों में होता है।

छन्द—वंशस्थ।

अलंकार—उत्प्रेक्षा "सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्"।

विशेष—राजा दुर्योधन अच्छी प्रकार से विचार करके ही शत्रु, मित्र, दुर्जन तथा सज्जन आदि को अपनी ओर मिलाने के लिए किस समय किस उपाय से काम लेना चाहिए इस प्रकार का प्रयोग करता है। इसके लिये वह अपने प्रत्येक कार्य में बड़ी सतर्कता का प्रयोग करता है। जिसका परिणाम यह होता है कि समृद्धियाँ अपने आप मानो एक दूसरे से स्पर्धा करते हुए उसके पास पहुँच जाती हैं। अपने आप किये गए कार्य में उसे कभी असफलता नहीं प्राप्त होती ॥१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥१६॥

अन्वय—अयुग्मच्छदगन्धिः, नृपोपायनदन्तिनां मदः, अनेकराजन्यरथाश्वसंकुलं, तदीयम्, आस्थाननिकेतनाजिरं, भृशम्, आर्द्रतां नयति ।

वाच्यान्तरम्—अयुग्मच्छदगन्धिना, नृपोपायनदन्तिनां मतेन, अनेकराजन्यरथाश्वसंकुलं, तदीयम्, आस्थाननिकेतनाजिरम् भृशम् आर्द्रतां नीयते ।

अनेकेति । अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्यासावयुग्मच्छद गन्धिः । 'सप्तम्युपमान' इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च 'उपमानाच्च' इति समासान्त इकारः । नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः । 'उपायनमुपग्राह्य-मुपहारस्तथोपदा' इत्यमरः । राज्ञामपत्यानि पुमांसो राजन्याः क्षत्रियाः । 'राजश्वशुराद्यत्' इति यत्प्रत्ययः । राज्ञोऽपत्ये जातिग्रहणादन् रथाश्वाश्वाश्च रथाश्वम् । सेनाङ्गत्वादेकवद्भावः । अनेकेषां राजन्यानां रथाश्वेन संकुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गणं भृशमत्यर्थमार्द्रतां पङ्किलत्वं नयति । एतेन महासमृद्धिरस्योक्ता । अत एवोदात्तालङ्कारः । तथा चालङ्कारसूत्रम्—समृद्धिमद्वस्तुवर्णनमुदात्तः' इति ।

अर्थ—सप्तपर्ण के फूल की गन्ध के समान गन्ध वाले, राजाओं से उपहार में प्राप्त हुये हाथियों का मदजल अनेक राजाओं के रथ और घोड़ों से पूर्ण उस दुर्योधन के आँगन को गीला अर्थात् कीचड़ युक्त बना देता है ।

व्याख्या—अयुग्मच्छदगन्धिः=सप्तपर्णसुगन्धिः (सप्तपर्ण की गन्ध के समान गन्ध वाला) नृपोपायनदन्तिनाम्=भूपोपहारीकृतगजानाम् (राजाओं से भेंट में प्राप्त हाथियों का) मदः=दानवारि (मदजल) अनेकराजन्यरथाश्वसंकुलम्=नानानरपतिरथाश्वपरिपूर्णम् (अनेक राजाओं के रथों तथा अश्वों से भरे हुये) तदीयम्=दुर्योधनीयम् (दुर्योधन का) आस्थाननिकेतनाजिरम्=राजसभामण्डपाङ्गणम् (राजसभा का आँगन) भृशम्=अत्यर्थम् (अधिक) आर्द्रताम्=पङ्किलत्वम् (गीलेपन को, कीचड़ को) नयति=प्रापयति (प्राप्त कर लेता है) ।

व्याकरणम्—अयुग्मच्छदगन्धिः—न युग्मम् अयुग्मम् अयुग्मानि छदानि यस्य असौ अयुग्मच्छदः । अयुग्मच्छदस्य गन्ध इव गन्धो यस्य स अयुग्मच्छदगन्धिः । अयुग्म से तात्पर्य विषम से है यह छतौन नामक वृक्ष के पत्ते के लिए प्रयुक्त होता है जिसका अर्थ 'सप्त' भी होता है । कोश के अनुसार भी "सप्तपर्णो विशालत्वक् शारदो विषमच्छदः" । यहाँ समास करने से प्राप्त दूसरे गन्ध शब्द का "सप्तम्युपमानपूर्वस्योत्तरपदलोपश्च वक्तव्यः" इस वार्तिक से समास होकर लोप हो जाता है । वार्तिक का अर्थ है कि सप्तमी में प्रयुक्त पद तथा उपमानपद पूर्व में आने पर समास होता है तथा उत्तर पद का लोप हो जाता है । यह कार्य होने पर 'अयुग्मच्छदगन्धः' यह होता है । ऐसी दशा में "उपमानाच्च" इस सूत्र से गन्ध शब्द के अन्त में अकार को इकार हो जाता है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नृपोपायनदन्तिनाम्—दन्तौ एषां स्तः इति दन्तिनः उपायनानि दन्तिनः इति उपायनदन्तिनः नृपाणां ये उपायनदन्तिनः नृपोपायनदन्तिनः तेषां नृपोपायनदन्तिनाम्। नृन् पाति इति नृपः नृ=पा+क। उप+अय्+ल्युट्=उपायन "उपायनमुपग्राह्यमुपहारस्तथोपदा" इत्यमरः।

अनेकराजन्यरथाश्वसंकुलम्—राज्ञां समूहो राजन्यः (वा) राज्ञामपत्यानिपुमांसो राजन्याः, अनेके च ते राजन्याः, अनेकराजन्याः, रथाश्च अश्वाश्च इति रथाश्वम्, अनेकं राजन्यरथाश्वम् इति अनेकराजन्यरथाश्वम् अनेकराजन्यरथाश्वेन सङ्कुलम् इति अनेकराजन्यरथाश्वसंकुलम्। राजन्+यत् (राजश्वशुराद् यत्) सूत्र से यत् प्रत्यय। भाव और कर्म को छोड़कर अन्यत्र शब्दों के बाद यकारादि तद्धित प्रत्यय आने पर अन्त 'न' का लोप नहीं होता। अतएव 'राजन्यः' में न का लोप नहीं हुआ।

तदीयम्=तस्य इदम् तदीयम्। तद्+छ+ईय+तदीयम्।

आस्थाननिकेतनाजिरम्—आस्थीयते अस्मिन् इति आस्थानम्, आस्थानस्य निकेतनम् इति आस्थाननिकेतनम्, आस्थाननिकेतनस्य अजिरम् इति आस्थाननिकेतनाजिरम्। आ+स्था+ल्युट्=आस्थानम्। नि+कित्+ल्युट्=निकेतनम्। "अङ्गणं चत्वराजिरे" इति कोशः। आर्द्रताम्=आर्द्रस्य भावः आर्द्रता ताम् आर्द्रताम्। अर्द्र+तल् (स्त्रियाम्)।

छन्द—वंशस्थ।

अलंकार—उदात्त। इस पद्य में दुर्योधन के महद् ऐश्वर्य का वर्णन होने के कारण उदात्त अलङ्कार है "लोकातिशयसम्पत्तिवर्णनमुदात्तः" सा० द० अलङ्कार सूत्र में भी कहा है कि=समृद्धिमद्वस्तुवर्णनमुदात्तः"।

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति ॥१७॥

अन्वय—चिराय, तस्मिन् क्षेमं, वितन्वति, अदेवमातृकाः, कुरवः, अकृष्टपच्याः, इव, कृषीवलैः, सुखेन, लभ्याः सस्यसम्पदः, दधतः, चकासति।

वाच्यान्तरम्—चिराय तस्मिन् क्षेमं वितन्वति (सति) अदेवमातृकैः कुरुभिः अकृष्टपच्या इव कृषीवलैः सुखेन लभ्याः सस्यसम्पदः दधद्भिः चकास्यते॥

सुखेनेति। चिराय तस्मिन्दुर्योधने क्षेत्रं वितन्वति क्षेमङ्करे सति। देवः पर्जन्य एव माता येषां ते देवमातृका वृष्टयम्बुजीविनो देशाः। ते न भवन्तीत्यदेवमातृकाः। नदीमातृकाः इत्यर्थः। 'देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्।' इत्यमरः। एतेनास्य कुल्यादिपूर्वप्रवर्तकत्वमुक्तम्। कुरूणां निवासाः कुरवो जनपदविशेषाः। कृष्टेन पच्यन्त इति कृष्टपच्याः। 'राजसूय' इत्यादिना कर्मकर्तरि क्यप्प्रत्ययान्तो निपातः। तद्विपरीता अकृष्टपच्या इव कृषिर्येषामस्तीति तैः कृषीवलैः। कर्षकैरित्यर्थः। 'रजः कृषि—' आदिना वलच् प्रत्ययः। 'वले' इति दीर्घः। सुखेनाक्लेशेन लभ्या लब्धुं शक्याः सस्यसम्पदो दधतो धारयन्तः। 'नाभ्यस्ताच्छतुः' इति,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नुमागमप्रतिषेधः । चकासति सर्वोत्कर्षेण वर्तन्ते इत्यर्थः । 'अदभ्यस्तात्' इति झेरदादेशः । 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा । सम्पन्नजनपदत्वादसन्तापकत्वाच्च दुःसाध्योऽयमिति भावः ॥

अर्थ—बहुत दिनों से प्रजाओं का हित साधने के लिये उपाय करते हुये राजा दुर्योधन के आधिपत्य में अदेवमातृक कुरुदेश बिना जोती हुई भूमि पर पकने वाली के समान तथा बिना परिश्रम ही किसानों द्वारा प्राप्त होने योग्य धन सम्पत्ति को धारण करता हुआ सुशोभित है ।

व्याख्या—चिराय=चिरकालम् (बहुत समय तक) तस्मिन्=दुर्योधने (दुर्योधन) क्षेमम्=कुशलम् (मंगल तथा हित कार्यों को) वितन्वति=कुर्वति सति (करते रहने पर) अदेवमातृकाः=वृष्ट्यम्बुनिरपेक्षाः (वर्षा के जल पर आधारित न रहने वाले) कुरवः=कुरुदेशनिवासिनः (कुरुदेश में रहने वाले) अकृष्टपच्या=अकर्षण-सिद्धाः स्वयमेव पच्यमानाः (बिना जोती हुई भूमि पर पकने वाली) कृषीवलैः=कृषकैः (किसानों द्वारा) सुखेन=अप्रयासेन (बिना परिश्रम के ही) लभ्याः=प्राप्याः (प्राप्त होने वाली) सस्यसम्पदः=धान्यादिसम्पत्तीः (धान्य-सम्पत्ति को) दधतः=धारयन्तः (धारण करता हुआ) चकासति=शोभन्ते (शोभित होते हैं) ।

व्याकरणम्—वितन्वति—वि+तन्+शतृ वितन्वन् स०ए०व० वितन्वति ।

अदेवमातृकाः—देव एव माता येषां ते देवमातृकाः न देवमातृकाः इति अदेव-मातृकाः 'नद्यृतश्च' सूत्र से 'मातृकाः' में कप् प्रत्यय हुआ है । देश दो प्रकार के होते हैं । एक देवमातृक दूसरे नदीमातृक। पहले प्रकार के देश में वर्षा के जल से खेतों में सिंचाई होती है ! कि.ानों को खेत सींचने के लिए परिश्रम नहीं करना पड़ता और अनाज की प्राप्ति सरलता से हो जाती है । दूसरे प्रकार के देश में नदी, नहर, कुआँ, बावली आदि का निर्माण कराकर बड़े परिश्रम से खेतों तक पानी पहुँचाया जाता है । इस कारण अन्न की प्राप्ति कठिनाई से होती है । इन दोनों का भेद अमरकोश में इस प्रकार स्पष्ट किया गया है—"देशो । नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः । स्यान्नदी-मातृको देवमातृकश्च यथाक्रमम्" । प्रयुक्त अदेवमातृक पद यह सूचित करता है कि देश देवमातृक नहीं है ।

कुरवः—कुरूणां निवासाः जनपदविशेषाः कुरवः ।

अकृष्टपच्याः—कृष्टेन पच्यन्ते इति कृष्टपच्याः न कृष्टपच्याः इत्यकृष्टपच्याः; कृष्+क्त=कृष्ट । पच्+क्यप्=पच्याः ।

कृषीवलैः—कृषिरस्ति येषां ते कृषीवलाः तैः कृषीवलैः । कृषि+वलच् । मत्वर्थीय वलच् प्रत्ययः "रजः कृष्यासुतिपरिषदो वलच्" से हुआ है । "क्षेत्राजीव कर्षकश्च कृषीवलः" इत्यमरकोशः ।

लभ्याः—लब्धुं शक्या इति लभ्याः—लभ+यत् ।

सस्यसम्पदः—सस्यस्य सम्पदः सस्यसम्पदः ।

दधतः—धा+शतृ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छन्द—वंशस्य।
अलंकार—उपमा।

विशेष—वनेचर राजा युधिष्ठिर से कहता है कि वहाँ से आपके चले आने के पश्चात् उस वर्तमान राजा दुर्योधन ने सिंचाई के अभाव को पूर्ण कर दिया है। इस प्रकार नहर; सरोवर तथा बाँध आदि खेती के उपयोगी सब साधनों की बहुलता के कारण कुरुदेश पर वर्षा की कमी का खेती पर कोई प्रभाव नहीं पड़ता है। तथा बिना अधिक परिश्रम किये हुए ही अन्न आदि की प्राप्ति उसी प्रकार सरलता से हो जाती है जैसे बिना जोती हुई भूमि पर अन्न मिल जाय। इस प्रकार वह सब प्रकार से अपने को पुष्ट बना रहा है ॥१७॥

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥१८॥

अन्वय—उदारकीर्तेः, दयावतः, अभिरक्षया, प्रशान्तबाधम्, उदयं, दिशतः, वसूपमानस्य, अस्य, गुणैः, उपस्नुता, मेदिनी, स्वयं, वसूनि प्रदुग्धे ॥

वाच्यान्तरम्—उपस्नुतया मेदिन्या स्वयं वसूनि प्रदुह्यन्ते।

उदारेति। उदारकीर्तेर्महायशसः। 'उदारो दातृमहतोः' इत्यमरः। दयावतः परदुःखप्रहाणेच्छोः। अतएव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात्तथेति क्रियाविशेषणम् उदयविशेषणं वा। 'वा दान्तशान्त' इत्यादिना शमिधातोर्ण्यन्तन्निष्ठान्तो निपातः। अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः सम्पादयतो वसूपमानस्य कुबेरोपमस्य। 'वसुर्मयूखाग्निधनाधिपेषु' इति विश्वः। अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्नुता द्राविता मेदिनी वसूनि धनानि। 'वसु तोयं धने मणौ' इति वैजयंती। स्वयं प्रदुग्धे। अक्लेशेन दुह्यत इत्यर्थः। दुहेः कर्मकर्तरि लट्। 'न दुहस्नुनमां यक्चिणौ' इति यक्प्रतिषेधः। यथा केनचिद्विदग्धेन नवप्रसूता रक्षिता च गौः स्वयं प्रदुग्धे तद्वदिति भावः। अलंकारस्तु—'विशेषणमार्गसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति सवस्वकारः। अत्र प्रतीमानया गवा सह प्रकृताङ्गया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशाद्दोह्यत्वेनोक्तिरिति संक्षेपः ॥

अर्थ—निर्मल यश तथा दया वाले और सभी प्रकार की रक्षा द्वारा प्रजाओं की बाधा रहित उन्नति करते हुए कुबेर के समान उसके गुणों से द्रावित हुई पृथ्वी स्वयं धन रूप दूध देती है।

व्याख्या—उदारकीर्तेः=महायशसः (महान् यश वाले का) दयावतः=दयाशीलस्य (दयावान् का) अभिरक्षया=सर्वतोरक्षणेन (सभी प्रकार की रक्षा से) प्रशान्तबाधम्=बाधारहितम् (बाधाओं से रहित) उदयम्=उन्नतिम् (उन्नति को) दिशतः=सम्पादयतः (सम्पादित करते हुए) वसूपमानस्य=कुबेरोपमस्य (कुबेर के समान) अस्य=दुर्योधनस्य (दुर्योधन का) गुणैः=दयादिगुणैः (दया दक्षिण्य गम्भीरता उदारता पराक्रम आदि गुणों द्वारा) उपस्नुता=द्राविता (द्रवित की गई) मेदिनी=पृथ्वी-स्वयम्=आत्मनैव (अपने आप) वसूनि=धनानि (धन को) प्रदुग्धे=दुह्यते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याकरणम्—उदारकीर्तेः=उदारा कीर्तिः यस्य असौ उदारकीर्तिः तस्य उदारकीर्तेः। उद्+रा+क स्त्रियां टाप्=उदारा। कृ+क्तिन्=कीर्तिः। उदयम्=उद्+अय्+अच्=उदयम्। दयावतः=दया अस्य अस्तीति दयावान् तस्य दयावतः। दया+मतुप् षष्ठी=दयावतः। यहाँ मतुप् के 'म' के स्थान पर 'व' आदेश हो गया।

अभिरक्षया—अभितो रक्षा अभिरक्षा तथा अभिरक्षया। अभि+रक्ष्+अ। प्रशान्तबाधम्—प्रकर्षेण शान्ता प्रशान्ता, प्रशान्ता बाधा यस्मिन् सः प्रशान्तबाधः तम् प्रशान्तबाधम्। प्र+शम्+णिच+क्त। दिश्+शत्+षष्ठी=दिशतः।

वसूपमानस्य—वसुः उपमानं यस्य स वसूपमानः तस्य वसूपमानस्य। "रत्नं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इति अमरकोशः "वसु तोये धने मणौ" इति मेदिनी। वसु शब्द का प्रयोग कुबेर के लिये भी किया जाता है।

उपस्नुता उप+स्नु+क्त स्त्रियां टाप्=उपस्नुता।

मेदिनी—मेदः अस्ति अस्यामिति मेदिनी। मेदं+इनि मत्वर्थे स्त्रियां मेदिनी।

छन्द—वंशस्थ।

अलंकार—समासोक्ति। विशेषणमात्रसाम्याद् प्रस्तुतस्य गम्यत्वे समासोक्तिः। यहाँ पर अप्रस्तुत गो के व्यवहार का केवल विशेषणों की समानता के कारण आरोप हो रहा है।

विशेष—जैसे कोई नवप्रसूता गो नये घास के कवलों के प्रदान करने से प्रसन्न होकर घास देने वाले व्यक्ति को स्वयं दुग्ध देती है, उसी प्रकार नम्रता से प्रजापालन करते हुए राजा दुर्योधन को प्रजा स्वय कर रूप असंख्य धन प्रदान करती है। कहीं-कहीं पर वह दुर्योधन प्रजा के सुख के लिये निर्जल प्रदेश में नहर, कूप आदि के द्वारा तथा रोगग्रस्त प्रदेश में दवाखाना, औषधालय आदि के द्वारा, कहीं पर दुर्भिक्ष पड़ने पर वह अनाथालय तथा अन्नादि व्यवस्था द्वारा प्रजा की रक्षा करता है। पृथ्वी धन-धान्य से पूर्ण थी। चारों ओर से सुरक्षा का प्रबन्ध होने के कारण चोरों आदि का भय न था। इस कारण सम्पत्तिक्षय की समस्या किसी प्रकार की नहीं थी।

पृथ्वी को मेदिनी कहा जाता है। क्योंकि जब विष्णु ने मधु और कैटभ नामक दो राक्षसों का वध किया तो सारी भूमि उनके मेद (मांस) से पूर्ण हो गई तभी से इसका नाम मेदिनी पड़ गया "मधुकैटभयोस्त्वासीन्मेदमांसपरिप्लुता। तेनेयं मेदिन नाम प्रोच्यते ब्रह्मवादिभिः॥"

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः। 83
न संहतास्तस्य न भिन्नवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥१९॥

अन्वय—महौजसः, मानधनाः धनार्चिताः, संयति, लब्धकीर्तयः, धनुर्भृतः, न संहताः, न भिन्नवृत्तयः, (अपितु) तस्य, असुभिः प्रियाणि, समीहितुम् वाञ्छन्ति।

वाच्यान्तरम्—महौजोभिः मानधनर्धनार्चितैः धनुर्भृद्भिः संयतिलब्धकीर्तिभिः संहतैः नभिन्नवृत्तिभिः भूयन्ते। किन्तु असुभिरपि प्रियाणि समीहितुं वाञ्छयन्ते॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महौजस इति । महौजसो महाबलाः अन्यथा दुर्बलानामनुपकारित्वादिति भावः। मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः। अन्यथा दारिद्र्यादेनं जह्यु-रिति भावः। संयति संग्रामे लब्धकीर्तयः बहुयशस इत्यर्थः। अन्यथा कदाचिन्मुह्येयुरिति भावः। संहता मिथः सङ्गताः स्वार्थनिष्ठा न भवन्तीति। न संहताः नञर्थस्य नशब्दस्य सुप्सुपेति समासः। भिन्नवृत्तयो। मिथो विरोधात्स्वामिकार्यकरा न भवन्तीति नभिन्न-वृत्तयः। पूर्ववत्समासः अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिणः स्युरित्युभयत्रापि तात्पर्यार्थः। धनुर्भृतो धानुष्काः आयुधीयमात्रोपलक्षणमेतत्। प्राधान्याद्धनुर्ग्रहणम्। तस्य दुर्योधनस्यासुभिः प्राणैः प्रियाणि समीहितुं कर्तुं वाञ्छन्ति आनृण्यार्थं प्राणान्दतु-मिच्छन्ति। अन्यथा दोपस्मरणादति भावः। अत्र महौजसादिपदार्थानां प्राणादानकर्त-व्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात्काव्यलिंगमलङ्कारः। लक्षणं तूक्तम्। यथा साभिप्रायविशेषणत्वात्परिकरालङ्कार इति द्वयोस्तिलतण्डुलवद्विभक्ततया स्फुरणा-त्संसृष्टिः॥

अर्थ—अत्यन्त तेजस्वी, अभिमान रूपी धन वाले, लक्ष्मी द्वारा सम्मानित अथवा राजा द्वारा अनेक बार पुरस्कृत, संग्राम में यश प्राप्त करने वाले तथा अपने स्वार्थ के लिये संगठित न होने वाले, सबके सब आपस के वैर भाव को भुलाकर एक ही लक्ष्य पर निर्भर रहने वाले धनुर्धर लोग अपने प्राणों की भी बाजी लगाकर उस दुर्योधन का कल्याण चाहते हैं।

व्याख्या—महौजसः—अतितेजस्विनः (अत्यन्त पराक्रमशाली) मानधनाः= मनस्विनः (मान रूपी धन वाले) धनार्चिताः=धनसत्कृताः (राजा के द्वारा बहुत धन से पुरस्कृत) संयति=युद्धे (युद्धस्थल में) लब्धकीर्तयः=प्राप्तयशसः (यश प्राप्त करने वाले) धनुर्भृतः=धनुर्धराः (धनुष को धारण करने वाले) न संहताः=न परस्परसंहताः (आपस में स्वार्थ बुद्धि से न मिले हुए) नभिन्नवृत्तयः=अपृथग्व्यापाराः (भिन्न व्यवहार न रहने वाले) तस्य=दुर्योधनस्य (उस दुर्योधन का) असुभिः=प्राणैः (प्राणों के द्वारा) प्रियाणि=हितानि (हितों को) समीहितुम्=विधातुम् (करने के लिए) वाञ्छन्ति= इच्छन्ति (चाहते हैं)॥

व्याकरणम्—महौजसः—महद् ओजो येषां ते महौजसः। ओज शब्द बल तथा वीर्य का वाचक है। इस प्रकार महतो सकलातिशायनी ओजसी=बलवीर्ये येषां ते महौजसः। "ओजो दीप्तौ बले स्रोत इन्द्रिये निम्नगारये" इत्यमरकोशः। ओजो दीप्ताववष्टम्भे प्रकाशबलयोरपि" इति मेदिनीकोशः।

मानधनाः—मान एव धनं येषां ते मानधनाः। मन+घञ्=मानः।

धनार्चिताः—धनैः अर्चिताः धनार्चिताः। अर्च्+णिच्+क्त=अर्चिताः।

लब्धकीर्तयः—लब्धा कीर्तिः यैस्ते लब्धकीर्तयः। लभ्+क्त+स्त्रियां=लब्धा।

संहताः—सम्+हन्+क्त।

धनुर्भृतः—धनूंषि बिभ्रतीति धनुर्भृतः धनुष्+भृ+क्विप्।

भिन्नवृत्तयः—भिन्ना वृत्तिर्येषां ते भिन्नवृत्तयः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असुभिः—असु, प्राण, दारा, अक्षत, लाजा आदि सदा बहुवचन में प्रयुक्त होते हैं। "पुंसि भुम्न्यसवः प्राणश्चैवं जीवोऽसुधारणम्" इत्यमरकोशः।

समीहितुम्—सम्+ईह्+तुमुन्।

छन्द—वंशस्थ।

अलंकार—काव्यलिंग तथा परिकर की तिलतण्डुलवत् संसृष्टि। महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्तयः आदि पद अपने विशेषण बल से प्राणदान के लिए प्रयुक्त है अतः "हेतोर्वाक्यपदार्थत्वे काव्यलिंग निगद्यते" इस सा० द० लक्षण के अनुसार काव्यलिङ्ग अलङ्कार है। इसके अतिरिक्त उपर्युक्त सभी विशेषण अभिप्रायः युक्त है। अतः काव्यप्रकाश के "विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः" लक्षण के अनुसार परिकर है। दोनों अलङ्कार तिल और चावल के मिश्रण के समान स्पष्ट प्रतीत होते हैं अतः दोनों की संसृष्टि है।

विशेष—दुर्योधन के लिए अपने प्राणों का उत्सर्ग करने वाले अत्यन्त तेजस्वी संग्राम में यश को प्राप्त करने वाले व्यक्ति सदैव तत्पर रहते हैं और वह अपनी उदारता से धन आदि के द्वारा उन्हें पुरस्कृत करता रहता है। यह सब अपने स्वार्थ के वशीभूत होकर उसकी सेवा नहीं करते अपितु उन सबका एक यही लक्ष्य है कि वे अपने स्वामी को सुदृढ़ बनायें ॥१९॥

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियाः।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ।।२०।।

अन्वय—अशेषितक्रियः, सः, सच्चरितैः, चरैः, महीभृताम् क्रियाः, निःशेषम्, वेद, हितानुबन्धिभिः, महोदयैः धातुः ईहितम्, इव, तस्य, (ईहितम्,) फलैः, प्रतीयते ॥

वाच्यान्तरम्—अशेषितक्रियेण तेन दुर्योधनेन सच्चरितैश्चरैरन्येषां महीभृतां क्रियाः ज्ञायन्ते (विद्यन्ते), हितानुबन्धिनो महोदयाः धातुरीहितमिव तस्य चेष्टितम्, फलैः प्रतियन्ति।

महीभृतामिति। अशेषितक्रियः। समापितकृत्यः। आफलोदयकर्मेत्यर्थः। दुर्योधनः। सच्चरितैः शुद्धचरितैः। अवञ्चकैरित्यर्थः। चरन्तीति चरास्तैश्चरैः प्रणिधिभिः। पचाद्यच्। महीभृतां क्रियाः प्रारम्भान्निःशेषं वेद वेत्ति। 'विदो लटो वा' इति णलादेशः। स्वरहस्यं तु न कश्चिद्वेदेत्याह—महोदयैरिति। धातुरिव तन्य दुर्योधनस्येहितमुद्योगो महोदयैर्महावृद्धिभिः। हितमनुबध्नन्त्यनुरुन्धतीति हितानुबन्धिभिः स्वन्तैरित्यर्थः। फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते। फलानुमेयस्यास्य प्रारम्भा इत्यर्थः॥

अर्थ—प्रारम्भ किये हुए कार्य को पूरा करने वाला वह दुर्योधन सच्चरित्र गुप्तचरों द्वारा राजाओं के कार्यों को पूर्ण रूप से समझ लेता है। परन्तु उस दुर्योधन की चेष्टा को ब्रह्मा की चेष्टा के समान फलों को देखकर ही लोग समझ पाते हैं॥

व्याख्या—अशेषितक्रियः=समापितकृत्यः (आवश्यक समस्त राजकार्यों को समाप्त करने वाला।) सः=दुर्योधनः (वह दुर्योधन) सच्चरितैः=शुद्धचरितैः (अच्छे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरित्र वाले) चरैः=गूढपुरुषैः (गुप्तचरों के द्वारा) महीभृताम्=राज्ञां (पृथ्वी का पालन करने वाले राजाओं की) क्रियाः=उद्योगान् (उपायों को, व्यवहार को) निःशेषम्=सम्पूर्णम् (सम्पूर्ण) वेद=जानाति (जानता है) हितानुवन्धिभिः=हितकारिभिः (कल्याण कार्य करने में तत्पर) महोदयैः=महानुभावैः आप्ततमैः (अत्यन्त विश्वसनीय राजाओं के द्वारा) धातुः=ईश्वरस्य (ईश्वर की या ब्रह्मा की) तस्य=दुर्योधनस्य (उस दुर्योधन की) ईहितम्=ईप्सितम् (चेष्टाओं को) फलैः=परिणामैः (परिणामों के द्वारा ही) प्रतीयते=ज्ञायते (जानी जाती है) ॥

व्याकरणम्—अशेषितक्रियः=न शेषिता अशेषिता क्रिया येन सः अशेषितक्रियः। शिष्+णिच्+क्त॥

सच्चरितैः—शोभनं चरितं येषां ते सच्चरिताः तैः सच्चरितैः। चर्+क्त। अस्+शतृ=सत्।

चरैः—चरन्तीति चराः तैः चरैः। चर्+अच्।

महीभृताम्—महीं पृथ्वीं बिभ्रतीति महीभृतस्तेषां महीभृताम्। मही+भृ+क्विप्।

निःशेषम्—निर्गतः शेषो यस्मात् तत् निःशेषम्। शिष्+घञ्।

हितानुवन्धिभिः—हितमनुवध्नन्तीति हितानुबन्धीनि तैः हितानुवन्धिभिः। हित+अनु+वन्ध्+णिनि।

महोदयैः—महानुदयो येषां ते महोदयास्तैः महोदयैः। उद्+अय्+अच्।

धातुः—दधातीति धाता तस्य धातुः। धा+तृच्।

ईहितम्—ईह्+क्त।

छन्द—वंशस्थ।

अलंकार—उपमा "साधर्म्यमुपमाभेदे" का० प्र०।

विशेष—राजा दुर्योधन राजा, प्रजा, भृत्य सभी के कार्यों को अपने विश्वासी गुप्तचरों द्वारा पहले ही ठीक प्रकार से जान लेता है। इस प्रकार वह बड़ी सतर्कता के साथ अपना शासन-कार्य चला रहा है। वह सबके चेष्टित विचारों तक को भी भली-भाँति जान लेता है परन्तु वह क्या कार्य करता है इसे कोई नहीं जान पाता। उसके कार्यों का पता तो सफलता मिलने पर ही लगता है। परिणाम को देखकर उसके कार्यों का ज्ञान होता है। जिस प्रकार विधाता या ईश्वर की बात को कोई नहीं समझ पाता उसी प्रकार उसके भी कार्य अत्यन्त गुप्त रहते हैं ॥२०॥

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥२१॥

अन्वय—तेन, क्वचित्, सज्य, धनुः, न उद्यतम्, व कोपविजिह्मम्, आननम्, न, कृतम् गुणानुरागेण, नराधिपैः, अस्य, शासनम्, माल्यमिव, शिभिरोः उह्यते॥

वाच्यान्तरम्—स क्वचित् सज्यं धनुः नोद्यतवान्, वा कोपविजिह्मम् आननं न कृतवान्। नराधिपाः गुणानुरोगेण अस्य शासनं माल्यमिव शिरोभिर्वहन्तीति॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नेति । तेन राज्ञा क्वचित् कुत्रापि । सह ज्यया मौर्व्या सज्यम् । 'मौर्वी ज्या शिञ्जिनी गुणः, इत्यमरः । 'तेन सहेति तुल्ययोगे' इति वहुव्रीहिः । धनुर्नोद्यतं नोर्ध्वीकृतम् । आननं च कोपविजिह्मं कोपकुटिलं न कृतम् । यस्य कोप एव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः 'कथं तर्ह्याज्ञां कारयति राज्ञ इत्यत्राह गुणेति । गुणेषु दयादाक्षिण्यादिष्वनुरागेण प्रेम्णा । माल्यपक्षे सूत्रानुषङ्गेण । यद्वा, सौरभ्यगुणलोभेन, । नराधिपैरस्य शासनमाज्ञा । मालैव माल्यं तदिव । 'चातुवर्ण्यादित्वात्स्वार्थे ष्यञ्' इति क्षीरस्वामी । शिरोभिरुह्यते धार्यते । 'वचिस्वपियजादीनां कीति' इति यकि सम्प्रसारणम् । अत्रोपमा स्फुटैव ॥

अर्थ—राजा दुर्योधन ने कभी भी प्रत्यंचा चढ़ाकर धनुष को नहीं उठाया और न कभी उसने क्रोधवश अपना मुख ही टेढ़ा किया है । आश्रित नृपतिगण उसके गुणों के वशीभूत होकर उसकी आज्ञा सिर पर उसी प्रकार धारण कर लेते हैं जैसे कोई फूलों की माला को शिर पर धारण कर लेता है ॥

व्याख्या—तेन=राज्ञा दुर्योधनेन (उस राजा दुर्योधन के द्वारा) क्वचित्=कुत्रापि (कहीं भी) सज्यम्=ज्यासहितम् (धनुष की डोरी के सहित) धनुः=चापम् (धनुष को) न उद्यतम्=नोत्थापितम् (नहीं उठाया गया) कोपविजिह्मम्=कोपकुटिलम् (क्रोध से टेढ़ा) आननम्=मुखम् (अपने मुख को) न कृतम्=न विहितम् (नहीं किया) गुणानुरागेण=गुणादिस्नेहेन (दया आदि गुणों के स्नेह से) नराधिपैः=भूपालैः (राजाओं के द्वारा) अस्य=दुर्योधनस्य (राजा दुर्योधन का) शासनम्=आज्ञा (आज्ञा) माल्यम्=पुष्पमाला इव (फूलों की माला के समान) शिरोभिः—शीर्षैः (शिर से) उह्यते=धार्यते (धारण करते है) ॥

व्याकरणम्—सज्यम्=ज्या सहितम् सज्यम् । यहाँ पर "तेन सहेति तुल्ययोगे" सूत्र से समास होकर "वोपसर्जनस्य" से सह के स्थान पर 'स' आदेश हो गया । "मौर्वी ज्या शिञ्जिनी गुणः' इति कोशः ।

नोद्यतम्=न+उद्+यम्+क्त ।

आननम्—"वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्" । इति कोशः । कोपविजिह्मम्=कोपेन विजिह्मम् कोपविजिह्मम् । कुप्+घञ्+कोपः "कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियाम्" इति कोशः । गुणानुरागेण=गुणेषु अनुरागः गुणानुरागः तेन गुणानुरागेण । अनु+रञ्ज्+घञ्=अनुरागः ।

नराधिपैः—नाराणाम् अधिपाः तैः नराधिपा; तैः-नराधिपाः । अधिपाति इति अधिपः । अधि+पा+क ।

शासनम्—माला एवं माल्यम् । "माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः" इति कोशः ।

शिरोभिः—उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्" । कोशः ।

छन्द—वंशस्थ ।

अलंकार—उपमा "साधर्म्यमुपमाभेदे" का० प्र० ।

विशेष—दुर्योधन के गुणों से सभी वर्ग के लोग प्रसन्न थे । किसी को किसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकार का कोई कष्ट नहीं था। सभी लोग उसकी आज्ञा को उसी प्रकार अपने शिर पर रखते थे अर्थात् स्वीकार करते थे जैसे फूलों की माला को लोग हर्ष के साथ धारण कर लेते हैं। आज तक उसने किसी भी शत्रु पर चढ़ाई नहीं की और न क्रोध ही किया है। सभी लोग उसके गुणों पर अनुरक्त थे ॥२१॥

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥२२॥

अन्वय—इद्धशासनः, सः, यौवराज्ये, नवयौवनोद्धतम्, दुःशासनम् निधाय, मखेषु, अखिन्नः, पुरोधसाः अनुमतः (सन्) हव्येन, हिरण्यरेतसम्, धिनोति ॥

वाच्यान्तरम्—तेन इद्धशासने यौवराज्ये नवयौवनोद्धतं दुःशासनं निधाय मखेषु अखिन्नेन पुरोधसाऽनुमतेन हव्येन हिरण्यरेतः धिन्व्यते ॥

स इति। इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनोद्धतं प्रगल्भम्। धुरन्धरमित्यर्थः। दुःखेन शास्यत इति दुःशासनस्तम् 'भाषायां शासियुधि' इत्यादिना खलर्थे युच्प्रत्ययः। यौवराज्ये युवराजकर्मणि। ब्राह्मणादित्वात्ष्यञ्। निधाय नियुज्येत्यर्थः। पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः। तस्मिन्याजके सतोस्यर्थः। तदुल्लघेन दोषस्मरणादिति भावः। 'निष्ठा' इति भूतार्थे क्तः न तु 'मतिबुद्धि' इत्यादिना वर्तमानार्थे। अन्यथा 'पुरोधसा' इत्यत्र 'क्तस्य च वर्तमाने' इति षष्ठी स्यात्। अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा। हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं धिनोति प्रीणयति। धिन्वेः प्रीणनार्थाद् 'धिन्विकृण्व्योर च' इत्युप्रत्ययः। अकारश्चान्तादेशः ॥

अर्थ—उग्र शासन करने वाला वह राजा दुर्योधन छोटे भाई दुःशासन को युवराज बनाकर स्वयम् यज्ञ में निश्चिन्त रूप से पुरोहित की आज्ञा के अनुसार अश्रान्त हव्यों के द्वारा अग्नि को सन्तुष्ट करता है ॥

व्याख्या—इद्धशासनः=उग्रशासनः (उग्र या कठोर शासन वाला) सः= दुर्योधनः (वह दुर्योधन) यौवराज्ये=युवराजकर्मणि (युवराज के पद पर) नवयौवनोद्धतम्=प्रगल्भम् (नई अवस्था के कारण अत्यन्त गर्वीला) दुःशासनम्=स्वानुजम् (अपने छोटे भाई दुःशासन को) निधाय=नियुज्य (नियुक्त करके) मखेषु=यज्ञेषु (यज्ञों में) अखिन्नः=अश्रान्तः (बिना थके हुए, आलस्यरहित, अविराम) पुरोधसा= पुरोहितेन (पुरोहित की आज्ञा से) अनुमतः=आज्ञातः (आज्ञा से) हव्येन=हविषा (यज्ञान्न) (यज्ञान्न के द्वारा) हिरण्यरेतसम्=अग्निम् (अग्नि को) धिनोति=जुहोति (हवन करता है)।

व्याकरणम्—इद्धशासनः—शिष्यते इति शासनम्, इद्धं शासनं यस्य सः इद्धशासनः। शास्+ल्युट्=शासनम्, इन्ध्+क्त=इद्धम् (बहुव्रीहि समास) इद्धः में ञिइन्धी से क्त प्रत्यय होने पर 'अनिदितां हल उपधायाः क्ङिति' से 'न' का लोप हो जाता है। शासनं राजदत्तोर्व्यां लेखाऽऽज्ञाशास्त्रशान्तिषु, इति मेदिनीकोशः ॥

यौवराज्ये—युवा चासौ राजा युवराजः, युवराज्यस्य भावः कर्म वा यौवराज्यम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिन् यौवराज्ये (कर्मधारय समास) यहाँ पर समास होने के अनन्तर 'राजाहःसखिभ्यष्टच्' सूत्र से राजन् अहन् तथा सखि शब्द के बाद टच् प्रत्यय लगता है, फलस्वरूप राजन् के 'अन्' का लोप होकर युवराज यह शब्द समास में हो जाता है। भाव में "गुणवचनब्राह्मणादिभ्यः कर्मणि च" से ष्यञ् प्रत्यय हो जाता है क्योंकि 'युवराज' शब्द ब्राह्मणादि गण (आकृतिगण) से ग्रहण किये जाते हैं।

नवयौवनोद्धतम्—यूनो भावः यौवनम्. नवं च तत् यौवनं, नवयौवनम्, नवयौवनेन उद्धतः नवयौवनोद्धतः तम्। युवन्+अण्=यौवनम्। उद्+हन्+क्त=उद्धतम्। 'तारुण्यं यौवनं समे' इत्यमरः। यहाँ यौवनम् में 'हायनान्तयुगादिभ्योऽण् ५।१।१३०। से अण्, प्रत्यय हो जाता है।

दुःशासनम्—दुःखेन शास्यते इति दुःशासनः तम् दुःशासनम्। दुर्+शास्—युच्। यहाँ पर उपसर्ग होने के कारण 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ३।३।१२६ से 'खल्' प्रत्यय प्राप्त था उसे बाधकर 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः' ३।३।१२८ इस वार्तिक से युच् प्रत्यय हो जाता है। तब दुर+शास्+युच्+अन=दुःशासन यह रूप होता है।

मखेषु—मखन्ति देवा अत्र अनेन वा मखः तेषु मखेषु। मख्+घञ्=मखः यहाँ 'हलश्च' ३।३।१२१ से घञ् प्रत्यय होता है। और संज्ञापूर्वक होने से यहाँ पर वृद्धि नहीं होती। अथवा कहीं-कहीं पर अपवादत्वात् 'पुंसि संज्ञायां घः प्रायेण' ३।३।११८ से घञ् के विषय में भी 'घ' प्रत्यय हो जाता है फलस्वरूप वृद्धि का प्रश्न ही नहीं उठ पाता। 'यज्ञः' सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः' इत्यमरः।

अखिन्न—खिद्यते इति खिन्नः न खिन्नः। अखिन्नः। खिद्+क्त। 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इस सूत्र से त, और द् को न हो गया। पुरोधसा—पुरः धत्ते धीयते वा इति पुरोधाः तेन पुरोधसा। पुरस्+धा+असि। यहाँ पर उणादि सूत्र 'पुरसि च' से 'असि' ईकार की इत्संज्ञा तथा लोप पुरोधस्। तृतीया विभक्ति के एकवचन में पुरोधसा रूप बनता है "पुरोधास्तु पुरोहितः" इत्यमरः॥

अनुमतः—अनु+मन् धातु से कर्म में 'क्त' प्रत्यय अनु+मन्+क्त अनुमतः। यहाँ पर निष्ठा, इस सूत्र से भूतकालिक अर्थ में क्त प्रत्यय का प्रयोग हुआ। 'मतिबुद्धिप्रत्यवसानार्थेभ्यश्च' से वर्तमान अर्थ में क्त प्रत्यय नहीं हुआ है। यदि वर्तमान अर्थ में 'क्त' प्रत्यय होता तो 'क्तस्य च वर्तमाने' सूत्र से पुरोधसा में षष्ठी विभक्ति हो जाती।

हव्येन—हूयते इति हव्यम् तेन हव्येन हु+यत्=हव्यम्। 'अचो यत्' से यत् पत्यय का प्रयोग किया गया है।

हिरण्यरेतसम्—हिरण्यं रेतो यस्य स हिरण्यरेताः तम् हिरण्यरेतसम्। "हिरण्यरेता हुतभुग्दहनो हव्यवाहनः" इत्यमरः।

छन्द—वंशस्थ।

विशेष—उपर्युक्त रीति से उस दुर्योधन ने सभी निकटवर्ती तथा अन्य राजाओं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

को अपने वश में करके अर्थ और काम की सिद्धि प्राप्त कर ली है। अब धर्मोपार्जन में व्यस्त रहता है। उसकी अब यही दैनिक चर्या हो गई है कि राज्य-कार्य से विरत होकर यज्ञादि कार्यों में निरत रहना। वह समझता है कि इस कृत्य से हमारे कपट पर परदा पड़ जायगा तथा अन्य सभी लोग मुझ पर पूर्ण विश्वास करने लगेंगे। इसीलिए उसने दुःशासन को सारा राज्यभार सौंप दिया है। दुःशासन पर राज्य भार है यही राजनीति का गुप्त रहस्य है। इसका शासन अति उग्र है और दुर्योधन धार्मिक कार्यों में रत है। इस कारण प्रजावर्ग में असन्तोष की भावना जाग्रत हो सकती है। प्रजा के विद्रोह के समय पर आपको सफलता अवश्य मिल जायेगी। अतः आप इस अवसर से अवश्य लाभ उठाने का प्रयास करिये। यहाँ पर इसी आशय की ओर तात्पर्य है ॥

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥२३॥

अन्वय—सः, प्रलीनभूपालं, स्थिरायति, आवारिधि भुवः, मण्डलम् प्रशासत्, अपि, त्वदेष्यतीः भियः, चिन्तयति, एव। अहो बलवद्विरोधिता दुरन्ता भवति ॥

वाच्यान्तरम्—तेन दुर्योधनेन प्रलीनभूपालं स्थिरायति, आवारिधि भुवो मण्डलं प्रशासता, त्वदेष्यस्यो भियश्चिन्त्यन्ते एव। अहो बलवद्विरोधितया दुरन्तया भूयते।

प्रलीनेति। स दुर्योधनः। प्रलीनभूपालम्। निःसपत्नमित्यर्थः स्थिरायति। चिरस्थायीत्यर्थः। भुवो मण्डलमावारिधिभ्य आवारिधि। आङ् मर्यादाऽभिविध्योः।' इत्यव्ययीभावः। प्रशासदाज्ञापयन्नपि। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा। 'नाभ्यय-स्ताच्छतुः' इति नुमागमप्रतिषेधः। त्वत्त एष्यतीरागमिष्यतीः। धातूनामनेकार्थत्वादु-क्तार्थसिद्धिः। अथवाऽऽङ्पूर्वः पाठः। 'एत्येधत्यूठ्सु' इति वृद्धिः। 'लृटः सद्वा' इति शतृ-प्रत्ययः। 'उगितश्च' इति ङीप्। 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः। भियो भयहेतून्। विपद इत्यर्थः। चिन्तयत्यालोचयत्येव। स एवाह अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना। सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसाय्येवेति तात्पर्यम्। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

अर्थ—वह दुर्योधन शत्रु राजाओं के नष्ट हो जाने पर भी, आगे भी किसी प्रकार की शङ्का न होने पर भी तथा समुद्रपर्यन्त भूमण्डल का शासन करते हुए भी आप से आने वाले भय को सोचता ही है। क्योंकि अपने से अधिक बल वाले के साथ विरोध करना दुःखान्त होता है।

व्याख्या—सः=दुर्योधनः (वह राजा दुर्योधन) प्रलीनभूपालम्=शत्रुरहितम् (शत्रुओं के नष्ट हो जाने पर भी) स्थिरायति=चिरस्थायि (भविष्य में भी स्थिर रहने वाले) आवारिधि=आसमुद्रम् (समुद्रपर्यन्त) भुवः=पृथिव्याः (पृथिवी का) मण्डलम्=चक्रम्, वलयम् (मण्डल को) प्रशासत्=आज्ञापयन्नपि (शासन करते हुए भी) त्वत्=भवतः (आपसे) एष्यतीः=शीघ्रमागामिनिः (शीघ्र आने वाली) भियः= विपदः (आपत्ति) चिन्तयति=विचारयति (सोचता है)।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहो=अश्चर्यम् दुःखम् (दुःख है कि) बलवद्विरोधिता=बलवता सह विरोधः (बलवान् के साथ शत्रुता) दुरन्ता=दुःखप्रदा (दुःख देने वाली)।

व्याकरणम्—प्रलीनभूपालम्—भुवं पालयतीति भूपालः, प्रलीनाः भूपालाः यस्मिन् तत् प्रलीनभूपालम्। प्र+ली+क्त=प्रलीन, भू+पा+णिच् यहाँ पर 'पातेर्णौ लुग्वक्तव्यः' इस वार्तिक से युगागम का बाध होकर लुगागम होकर भू+पा+ल अण् =भूपाल होता है। पाल् रक्षणे धातु से भी भूपाल शब्द की सिद्धि होती है।

स्थिरायति—स्थिरा आयतिः उत्तरकालो यस्य तत् स्थिरायतिः। यह 'भूमण्डलम्' का विशेषण है जिसका अर्थ होता है आगे आने वाले समय में भी स्थिर रहने वाले भूमण्डल का शासन करता हुआ। 'उत्तरः काल आयतिः' इत्यमरः।

आवारिधि—वारि धीयते अस्मिन् इति वारिधि, वारिधिभ्यः आ इति आवारिधि। वारि+धा का यहाँ पर 'आतो लोप इति च' सूत्र से 'धा' के अ का लोप होकर वारिधि बनता है। 'उदधिर्वारिधिः सिन्धुः सागरश्च सरित्पतिः" इति कोषः॥

त्वदेष्यतीः—त्वत्तः एष्यतीः त्वदेष्यतीः। (आ+इ+लृट्+शतृ+ङीप्) यहाँ पर भविष्यत् अर्थ में लृट् आने पर 'लृटः सद्वा' सूत्र से शतृ प्रत्यम् हो जाता है, साथ ही 'स्यतासी लृलुटोः' सूत्र से स्य हो जाता है। स्त्रीत्व की विवक्षा में 'उगितश्च' से ङीप् होकर एष्यतीः सिद्ध होता है। इस प्रकार 'एष्यतीः' का अर्थ 'जाती हुई' होता है परन्तु यहाँ पर आती हुई यह अर्थ प्राप्त होता है। इस विरोध को दूर करने के लिये मल्लिनाथ ने धातुओं को अनेकानेक मानकर दूर किया। दूसरे ने 'वदेष्यतीः' के स्थान पर 'त्वदैष्यती' पाठ माना है। यन पाठ मानने पर आ+एष्यतीः 'एत्येधत्यूठ्सु' से वृद्धि 'त्वदैष्यतीः' जिसका अर्थ 'आती हुई' होता है और 'आच्छीनद्योर्नुम्' सूत्र से नुम् का आगम हो जाता है यह सूत्र विकल्प से नुमागम करता है॥

भियः—विभेति अस्मात् इति भीः ताः भियः। "भीतिर्भीः साध्वसं भयम्"।

बलवद्विरोधिता बलमस्ति अस्य इति बलवान्, विरोद्धुं शीलमस्य इति विरोधी, बलवद्भिः विरोधी इति बलवद्विरोधी तस्य भावः बलवद्विरोधिता।

दुरन्ता—दुष्टः अन्तो यस्याः या दुरन्ता

अहो—यह अव्ययवाचक शब्द है।

छन्द—वंशस्थ।

अलंकार—अर्थान्तरन्यास। यहाँ पर सामान्य से विशेष का समर्थन किया गया है। अतः उक्त अलङ्कार है।

विशेष—हे महाराज युधिष्ठिर! दुर्योधन का शासन इस समय सुदृढ़ तथा सुचारु रूप से चल रहा है क्योंकि उसने समस्त विरोधी राजाओं को येन केन प्रकारेण अपने अधीन कर लिया है। वह समुद्र पर्यन्त सम्पूर्ण भूमण्डल का एक मात्र शासक है फिर भी आपसे आने वाले पराभव से सदैव शंकित रहता है, क्योंकि बलवान् व्यक्ति के साथ विरोध करने से सदैव अनर्थ का भय बना रहता है॥२३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद्व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ॥२४॥

अन्वय—कथाप्रसंगेन, जनैः, उदाहृतात् तव, अभिधानात् अनुस्मृताखण्डलसुनुविक्रमः, नताननः, सः (दुर्योधनः) सुदुःसहात्, मन्त्रपदात् उरगः, इव व्यथते ॥

वाच्यान्तरम्—कथाप्रसङ्गेन जनैः उदाहृतात्, अनुस्मृताखण्डलसूनुविक्रमेण नताननेन तेन सुदुःसहान्मन्त्रपदाद् उरगेण इव तवाभिधानाद् व्यथ्यते ॥

कथेति । कथाप्रसङ्गेन गोष्ठीवचनेन जनैः तत्रस्थैरित्यर्थः । अन्यत्र कथाप्रसङ्गेन विषवैद्येन । 'कथाप्रसङ्गो वार्तायां विषवैद्येऽपि वाच्यवत्' इति विश्वः । एकवचनस्यातन्त्रत्वाज्जनविशेषणम् । यद्वा, कथाप्रसङ्ग इनाश्च ते जनाश्चेत्येकं पदम् । उदाहृतादुच्चारितात्तवाभिधानान्नामधेयात्स्मारकाद्धेतोः 'हेतौ' इति पञ्चमी । 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः । अन्यत्र तवाभिधानात् । 'नामैकदेशग्रहणे नाममात्रग्रहणम्' इति न्यायात् । तश्च वश्च तवौ तार्क्ष्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात् । अनुस्मृताखण्डलसुनुविक्रमः स्मृतार्जुनपराक्रमः सन् दुःसहादतिदुःसहान्मन्त्रपदान्मन्त्रशब्दात्स्मारकाद्धेतोः । आखण्डलसूनुरिन्द्रानुजः उपेन्द्रो विष्णुरिति यावत् । 'सूनुः पुत्रेऽनुजे रवौ' इति विश्वः । तस्य विः पक्षी । गरुड इत्यर्थः । तस्य क्रमः पादविक्षेपः सोऽनुस्मृतो येन स तथोक्तः स्मृतगरुडमहिमा । उरग इव, नताननः सन् । व्यथते दुःखायते । 'पीड़ा बाधा व्यथा दुखम्' इत्यमरः । अत्युत्कटभये दोपादिविकारा दुर्वारा इति भावः । 'सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्' इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम् ।

अर्थ—वार्तालाप के प्रसंग के अवसर पर लोगों के मुख से निकले हुए आप लोगों के नाम को सुनकर दुर्योधन को अर्जुन के पराक्रम की स्मृति आ जाती है । फलस्वरूप जैसे विषवैद्य सँपेरों के मुख से निकले हुए पदों को सुनकर साँप फण झुका लेता है उसी प्रकार वह भी नतमस्तक हो जाता है और भीतर ही भीतर दुःखी हो जाता है ।

व्याख्या—दुर्योधन के पक्ष में—कथाप्रसंगेन=वार्तानुक्रमेण (बातचीत के प्रसंग के अवसर पर) जनैः=लोकैः (लोगों के द्वारा) उदाहृतात्=उच्चारितात् (उच्चारित होने से) तव=भवतः (आप युधिष्ठिर का) अभिधानात्=नाम्नः (नाम से) अनुस्मृताखण्डलसूनुविक्रमः=स्मृतार्जुनपराक्रमः (अर्जुन के महापराक्रम का स्मरण करके) नताननः=नम्रमुखः (नीचे की ओर मुख किये) सः=दुर्योधनः (वह दुर्योधन) सुदुःसहात्=अतिदुःसहात् (अति कठिनाई से भी न सहने योग्य) मन्त्रपदात्=मन्त्रशब्दात् (मन्त्र सुनकर) उरग इव=सर्प इव (साँप के समान) व्यथते=पीडामनुभवति (पीड़ा का अनुभव करता है ।)

सर्प के पक्ष में—कथाप्रसंगेन जनैः=विषवैद्यप्रमुखैर्जनैः (सर्प-विद्या को जानने वाले लोगों के द्वारा) उदाहृतात्=उच्चारितात् (उच्चारण किया गया) तवाभिधानात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

=ताक्ष्यंवासुकिनामकथनात् (ताक्ष्यंवासुकी आदि के नाम को बताने वाले) मन्त्रपदात् =मन्त्रावयवात् (मन्त्रों के अवयवभूत पदों से) अनुस्मृताखण्डलसूनुविक्रमः=स्मृत-गरुडवेगः (विष्णु के वाहन गरुड़ का स्मरण करके) नताननः=अधोमुखः (नीचे मुख किये हुये) व्यथते=क्लिश्यति (कष्ट का अनुभव करता है)।

व्याकरणम्—कथाप्रसंगेन=कथानां प्रसंगः कथाप्रसंगः तेन कथाप्रसंगेन। यह व्याख्या अर्जुन के पक्ष में। उरग के पक्ष में इनाश्च ते जनाः इनजनाः कथाप्रसंगेषु इनजनाः इति कथाप्रसंगेनजनाः तैः कथाप्रसंगेनजनः। अथवा कथाप्रसंगानाम् इनाः (स्वामिनः) कथाप्रसंगेनाः ते च ते जनाश्च कथाप्रसंगेनजनाः तैः कथाप्रसंगेनजनैः। यहाँ 'कथाप्रसंगेनजनैः' को एक पद माना जाता है तथा एकवचनस्य अतन्त्रत्वात्' कथा-प्रसंगेन यह जन का भी विशेषण होता है। यहाँ पर श्लेष के द्वारा 'कथाप्रसंगेन' के दो अर्थ होते हैं एक अर्थ 'वार्तालाप के प्रसंग में' होता है और दूसरा अर्थ 'श्रेष्ठ विष-वैद्यों द्वारा' होता है। 'कथाप्रसंगो वर्ताय विषवैद्येऽपि वाच्यवत्' तथा 'इनः प्रभौ नृपः सूर्ये' इस विश्वकोष के अनुसार कथाप्रसंग का अर्थ विषवैद्य तथा इनका अर्थ श्रेष्ठ या राजा होता है॥

उदाहृतात्—उद्=आ+हृ+क्त (पंचमी) तस्मात् उदाहृतात्।

तवाभिधानात्—तव अभिधानम् तवाभिधानं तस्मात् तवाभिधानात्। यहाँ पर 'हेतौ' सूत्र से पंचमी विभक्ति (सर्पपक्ष में) नाग जाति के ताक्ष्य और वासुकी दो महान् सर्प माने जाते हैं। इसका अर्थ करने पर समास प्रकार होगा 'नामैकदेशग्रहणे नामैमात्रग्रहणम्' इस नियम के अनुसार दोनों के आदि अक्षर 'त' और 'व' को समास किया जाता है। तश्च वश्च तवौ, तवयोः अभिधानम् यस्मिन् तस्मात् तवाभिधानात्। अभि+धा+ल्युट्। 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः।

अनुस्मृताखण्डलसूनुविक्रमः—आखण्डयति इति आखण्डलः "वृषादिभ्यः कलच्" इस उणादि सूत्र से कलच् प्रत्यय होने पर आखण्डलः सिद्ध होता है। सूयते इति सूनुः 'सुवः किम्' इस उणादि सूत्र से 'नुः' प्रत्यय होकर सूनुः सिद्ध होता है। आखण्डलस्य सूनुः, आखण्डलसूनुः आखण्डलसूनोः विक्रमः, आखण्डलसूनुविक्रमः, अनुस्मृतः आखण्डल-सूनुविक्रमो येन सः अनुस्मृताखण्डलसूनुविक्रमः (दुर्योधन पक्ष में) 'सूनुः पुत्रेऽनुजे रवौ' इस विश्वकोष के आधार पर सूनु का अर्थ अनुज भी होता है। यहाँ पर यह तर्क करना स्वाभाविक है कि युधिष्ठिर के रहते हुए अर्जुन की बड़ाई करना ठीक नहीं परन्तु सज्जन लोग अपने पुत्र, शिष्य या अनुज की श्रेष्ठता पर प्रसन्न होते हैं 'सर्वतो जयमन्विच्छेत् पुत्रादिच्छेत्पराजयम्' ऐसा नीतिशास्त्र का कथन है। इसके अतिरिक्त इससे यह ध्वनि भी प्रकट होती है कि जब अर्जुन के नाम को सुनकर वह इतना व्यथित होता है तो आपके (युधिष्ठिर के) नाम को सुनकर तो नितान्त हतोत्साह तथा मूच्छित हो जाता होगा। (सर्प पक्ष में) विष्णु को इन्द्र का छोटा भाई माना जाता है इसलिए उन्हें उपेन्द्र कहा जाता है अतः आखण्डलसूनु का अर्थ 'विष्णु' 'विः' का अर्थ पक्षी होता है। अमरकोष के अनुसार भी 'विविष्किरपतयः' कहा गया है। अतः 'विः'

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

का अर्थ यहाँ गरुड़ लिया जाता है। 'वा' धातु इण् प्रत्यय उणादि सूत्र 'वातेर्डिच्च' सेटि का लोप विः आखण्डलस्य सूनुः, वाति इति विः, आखण्डलस्य सूनोः विः आखण्डल-सूनुविः क्रमः आखण्डलसूनुवेः आखण्डलसूनुविक्रमः अनुस्मृतः आखण्डलसूनुविक्रमो येन सः अनुस्मृताखण्डलसूनुविक्रमः। 'आखण्डलः सहस्राक्षः' इत्यमरः। "विक्रमः पादविक्षेपे सामर्थ्येऽपि च कथ्यते" इति।

नताननः—नतम् आननं यस्य स नताननः। नम्+क्त नतः आनन्ति अनेन इति आननम्। आ+अन्+ल्युट्। वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्' इत्यमरः। 'आस्यं मुखं तु वदनमाननं वक्त्रमित्यपि' इति कोषः।

सुदु सहात्—दुःखेन सह्यते इति दुःसहम् सुष्ठु दुसहम् इति सुदुःसहम् तस्मात् सुदूःसहात् दुर्+सह्+खल्। दुःसहम्। यहाँ पर 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' सूत्र से 'खल्' प्रत्यय होता है। अर्थात् दुःखार्थक और सुखार्थक ईषद् आदि उपपद रहने पर धातु से भाव और कर्म अर्थ में खल् प्रत्यय होता है।

मन्त्रपदात—मन्त्रस्य पदं मन्त्रपदं तस्मात् मन्त्रपदात्। यहाँ पर 'हेतौ' इस सूत्र से पंचमी विभक्ति। अथवा 'ल्यब्लोपे कर्मण्यधिकरणे' सूत्र से 'मन्त्रपदं श्रुत्वा' यह अर्थ करने पर पंचमी विभक्ति होगी। मन्त्र्यते इति मन्त्रम्। मन्त्रि गुप्तभाषणे धातु से घञ् प्रत्यय 'भावे' सूत्र से होता है। वेदभेदे गुह्यवादे मन्त्रः" इत्यमरः। 'मन्त्रो देव-विशेषे स्याद् देवादीनां च साधने। गुह्यवादेऽपि च पुमान्' इति मेदिनीकोशः॥

उरगः—उरसा गच्छति इति उरगः। उरस्+गम्+ड यहाँ पर उरस् पूर्वक गम्लृ (गम्) धातु से 'उरसो लोपश्च' से 'ड' प्रत्यय तथा उरस् के स का लोप हो जाता है। इसका अर्थ है कि—कर्मसंज्ञक 'उरस्' उपपद रहते हुए गम् धातु से 'ड' प्रत्यय हो तथा उरस् के अन्त का लोप हो जाय। 'उरगः पन्नगो भोगी जिह्मगः पवनाशनः' इत्यमरः।

छन्द—वंशस्थ।

अलंकार—पूर्णोपमा तथा श्लेष। इस श्लोक में श्लेषानुप्राणित पूर्णोपमालंकार है "सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च। उपमेयं चोपमानं भवेद्वाच्यम्।" अर्थात् सामान्यधर्म, उपमावाचक, उपमेय और उपमान ये चारों यदि वाच्य हों (किसी शब्द से प्रतिपादित हों) व्यंग्य या आक्षेप्य न हों तो उसे पूर्णोपमा कहते हैं। दो पदार्थों की तुल्यता के कारणीभूत गुण क्रिया आदि को सामान्य धर्म या साधारण धर्म कहते हैं। इव, यथा, तुल्य, सदृश, सम्, वत् आदि उपमावाचक शब्द, वर्णनीय उपमेय तथा समानता के निरूपक आदि को उपमान कहते हैं। यहाँ पर 'सः' उपमेय, उरग-उपमान, इव वाचक शब्द, अर्जुन या विष्णु के पक्षी गरुड़ का स्मरण तथा नतानन होना साधारण धर्म आदि है अतः पूर्णोपमा है। इसके अतिरिक्त श्लेषालङ्कार भी है, क्योंकि श्लेष वहाँ होता है जहाँ एक ही वाक्य में अनेक अर्थ हों। "श्लेषः स वाक्ये एकस्मिन् यत्रा-नेकार्थता भवेत्" यहाँ पर "कथाप्रसंगेन जनैः" "तवाभिधानात्" तथा 'अनुस्मृताखण्डल-सूनुविक्रमः' में श्लेषालङ्कार है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेष—वनेचर दुर्योधन की शङ्कालु प्रवृत्ति का वर्णन करता हुआ कहता है कि दुर्योधन आपके पराक्रमी भ्राता अर्जुन का नाम सुनकर उसी प्रकार व्यथित होता है जिस प्रकार विष्णु का वाहन गरुड़ का नाम सुनकर ताक्ष्य और वासुकी नाग व्यथित होकर नतमस्तक हो जाते हैं। इससे व्यंग्यार्थ द्वारा युधिष्ठिर का वर्णन किया गया है ।।२४।।

तदाशु कर्त्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ।।२५।।

अन्वय—तत्, त्वयि, जिह्मं, कर्तुम् उद्यते, तत्र, विधेयम्, उत्तरम्, आशु, विधीयताम्। परप्रणीतानि वचांसि, चिन्वतां, मादृशां, गिरः प्रवृत्तिसाराः, खलु ।।

वाच्यान्तरम्—तत् त्वयि जिह्मं कर्तुम् उद्यते तत्र विधेयम् उत्तरं विधेहि परप्रणीतानि वचांसि चिन्वतां मादृशां गीर्भिः प्रवृत्तिसाराभिर्भूयते ।।

तदिति । तत्तस्मात्त्वयि जिह्मं कपटं कर्तुमुद्यते । त्वां जिघांसावित्यर्थः । तत्र तस्मिन्दुर्योधने विधेयं कर्त्तव्यमुत्तरं प्रतिक्रियाऽऽशु विधीयतां क्रियताम् । ननु कर्त्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह—परेति । परप्रणीताति परोक्तानि वचांसि चिन्वतां गवेषयतां मादृशाम्, वार्त्ताहारिणामित्यर्थः गिरः प्रवृत्तिसारा वार्त्तामात्रसाराः खलु, 'वार्त्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः । वार्तामात्रवादिनो वयम्, न तु कर्त्तव्यार्थोपदेशसमर्थाः, अतस्त्वयैव निर्धार्यं कार्यमिति भावः, सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ।।

अर्थ—महाराज युधिष्ठिर ! इस प्रकार वह दुर्योधन आपके साथ कपटपूर्ण कुत्सित व्यवहार करना चाहता है । अतः आप शीघ्र उसका प्रतीकार करने के लिये उद्यत हो जाइये । क्योंकि दूसरे के कहे हुए वाक्यों को आप तक पहुँचा देना ही हमारा काम है । आगे की आप सोचिये ।

व्याख्या—तत्=तस्मात् (इससे) त्वयि=भवति (आपके प्रति) जिह्मम्=कपटम् (कपट को) कर्तुम्=विधातुम् (करने के लिए) उद्यते=प्रवृत्ते (तत्पर) तत्र=तस्मिन् (उन दुर्योधन में) विधेयम्=कर्तव्यं (अपने कर्तव्य को) उत्तरम्=प्रतिविधानम् (प्रतीकार को) आशु=शीघ्रम् (अतिशीघ्र ही) विधयताम्=क्रियताम् (करना चाहिये) परप्रणीतानि=परैः कथितानि (दूसरों के द्वारा कहे हुए) वचांसि=वाक्यानि (वाक्यों को) चिन्वताम्=गवेषयताम् (संग्रह करते हुए तथा गूढ़ बातों का अन्वेषण करने वाले) मादृशाम्=मद्विधानाम् (हमारे समान दूसरो की बात को आप तक पहुँचाने वाले गुप्तचरों की) गिरः=वाण्यः (वार्ता) प्रवृत्तिसाराः=वृत्तान्तमात्रसाराः= (समाचारों को केवल बतलाने वाली) खलु=निश्चयेन (निश्चय रूप से होती है) ।।

व्याकरणम्—जिह्मम्+जाहित सरलमार्गम् इति जिह्मः तम् जिह्मम् । हा+मन् । यहाँ पर उणादि सूत्र जहाति 'सन्वदालोपश्च' से 'आ' का लोप हो जाता है तथा हा को द्वित्व होने के कारण पूर्व हा के 'आ' को 'सन्यतः' सूत्र से इत्व होकर 'जिह्मः' सिद्ध होता है । "जिह्मास्तु कुटिले मन्दे क्लीबे तगरपादपे" इति मेदिनी । "अरालं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृजिनं जिह्ममूर्मिमत्कुंचितं नतम् । आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि" इत्यमरः । कृ+तुमुन्=कर्तुम् ।

उद्यते—उद्+यम्+क्त=सप्तमी एकवचन उद्यते ।

तत्र—तस्मिन् इति तत्र । सप्तम्यन्त किम्, यत्, तत् आदि से त्रल् प्रत्यय होता है । यह प्रत्यय स्वतन्त्र प्रत्यय है सप्तमी के स्थान पर नहीं होता । तत्+त्रल् सप्तम्यर्थे । यह अव्यय वाचक होते हैं ।

विधेयम्—विधातुं योग्यं विधेयम् । वि+धा+यत् । यहाँ पर 'अचो यत्' सूत्र से यत् प्रत्यय होकर 'ईद्यति' सूत्र से 'आ' को ई हो जाता है अतः 'ई' को गुण होकर विधेयम् सिद्ध होता है ।

परप्रणीतानि—परैः प्रणीतानि परप्रणीतानि । प्र+नी+क्त प्रणीतानि यहाँ पर 'उपसर्गादसमासेऽपिणोपदेशस्य' सूत्र से न को ण हो गया है ।

वचांसि—वच्+असुङ्=तानि वचांसि नपुंसकलिंग । वचः वचसी वचांसि । वचः वचसी वचांसि ।

चिन्वताम्—चि=शतृ—चिन्वन् तेषाम् चिन्वताम् ।

मादृशाः—माम् इव एताम् पश्यन्ति जनाः तेषाम्, मादृशाम्, माम् इव आत्मानं पश्यन्ति इति तेषाम् मादृशान् । अस्मद्+दृश्+क्विन् । यहाँ पर "प्रत्ययोत्तरपदयोश्च" सूत्र से म पर्यन्त को अर्थात् 'अस्मद्' में केवल अस्य के स्थान पर 'म' आदेश हो जाता है तब 'मद्' केवल शेष रहता है । इसके अनन्तर अज्ञानार्थक दृश् धातु को त्यदादि पूर्व में रहने पर कञ् या क्विन् प्रत्यय 'त्यदादिषु दृशोऽनालोचने कञ्च" से हो जाता है । यहाँ पर क्विन् प्रत्यय का प्रयोग हुआ है क्योंकि 'कञ्' प्रत्यय होने पर शब्द अकारान्त होकर राम के समान षष्ठी बहुवचन में मादृशानाम् यह प्रयोग बनेगा परन्तु क्विन् प्रत्यय होने पर हलन्त शब्द रहेगा । मद्+क्विन् ऐसी अवस्था में 'आ सर्वनाम्नः' सूत्र से सर्वनाम को आकार अन्तादेश होता है । अतः यहाँ पर 'मद्' के द को आ होकर मादृश् था षष्ठी में मादृशाम् रूप सिद्ध हुआ है ।

गिरः—गीर्यते इति गिरः गॄ+क्विप्=गिर्, "गीर्वाग्वाणी सरस्वती" ।

प्रवृत्तिसाराः—प्रवृत्तिः सारो यासां ताः प्रवृत्तिसाराः । प्र+वृ+क्तिन् प्रवृत्तिः, सृ+घञ्=सारः । प्रवृत्ति का अर्थ कोष के अनुसार भिन्न-भिन्न होता है; जैसे "वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादथाह्वयः" इत्यमरः । इस अमरकोष के प्रमाण से प्रवृत्ति का अर्थ 'वार्ता' होता है; जैसा कि मल्लिनाथ ने व्यक्त किया है । दूसरा अर्थ प्रवर्त्तन भी मेदनी कोष के अनुसार होता है "प्रवृत्तिस्तु प्रवाहे स्यात् उदन्ते च प्रवर्त्तने" इति । इसके अनुसार 'प्रर्त्तन' अर्थ करना चाहिए । 'सार' का अर्थ बल होता है 'सारो बले स्थिरांशे च' इत्यमरः ।

